1362

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 580

Title: [illegible]

580

Book on ন্যায়.

			Title
		Jagadeesha Tarkalankar	Author
			Editor
			Year, Vols.
			Publisher
580			Remarks

जाग.अ. श्रीमन्महागणाधिपतयेनमः सस्मिताननसरोजमंगणे रिंगमाणमतिलोलकुंडलं रोचनोल्लसितभालमस्तु मे के
शवं मनसि गिरीशबालवपुः १ प्राच्यैरनुचितविविधपक्षोद्दैः कलुषीकृताप्यधुना दीधितिर्युतमणिरेषः श्रीजगदीशप्रकाशितः
१ स्फुरतु २ परमात्मने सर्वोत्कृष्टायात्मनेनमः प्रकर्षश्चोत्पत्तिस्थितिविनाशकर्तृत्वं तस्य चैकत्र संभवो न सहकार्यसत्त्वं वि
नात आह ॐमिति ब्रह्मविष्णुशिवात्मकायेत्यर्थः तत्तच्छरीरसहकारान्नानाकार्यकर्तृत्वं नानुपपन्नमितिभावः यद्य
पि सुखादिसमवायिकारणतावच्छेदकतया द्रव्यमानसप्रत्यक्षविषयविधया कारणतावच्छेदकतया वा सिद्धया आत्मत्व
जात्या ईश्वरावृत्तित्वादात्मनदयसंगतं नित्यत्वस्याप्रयोजकत्वेन तादृशजातेरीश्वरवृत्तित्वोपगमे तु गगना
दावपि तत्संसंगात् द्रव्यत्वमेव वा सुखादिसमवायिकारणतावच्छेदकं भवेदिति प्रसंगस्य तुल्यत्वात् अतएव लाघवेना
त्मत्वजातिरेवात्मपदप्रवृत्तिनिमित्ततया आत्मपदगर्भा श्रुतिरेव तत्रात्मत्वजातिसत्त्वे प्रमाणमित्युक्तावपि न निस्तारः श १
क्यतावच्छेदकतया जातिसिद्धेरुपसिद्धत्वात् तथाप्यात्मपदं रूपावदर्थकमित्याकूः नमस्यतौ प्रयोजकरूपांतरमाह
सर्वेति सर्वभूतानि सर्वप्राणिनो विष्टभ्य स्वस्वकार्ये नियोज्य परितिष्ठते स्थितायेत्यर्थः केचित्तु भूतपदं यथाश्रुता

र्थकमेव विशेषोपि धारणात्मकसंयोगविशेषः न च विभुद्वयसंयोगास्वीकारात् आकाशेन समं कथं तस्य संयोग इत्यसंग
तिः न च मते गगनस्येश्वरानतिरिक्तत्वात् तत्र च स्वप्रतियोगिकसंयोगविरहेपि स्ववृत्तिसंयोगानपायादित्याकूः अखं
डो नित्य आनंदबोधो यस्य तस्मै नम इत्यर्थः न च सुखत्वावच्छेदेन पुण्यजन्यतया नित्यसुखासंभवः श्रुतिवाक्येभ्यो नित्य
सुखसिद्धौ सुखत्वावांतरजातेरेव पुण्यजन्यतावच्छेदकत्वकल्पनात् आनंदाय सुखादिरूपाय बोधाय[illegible]दृशा
नित्योऽखंडस्तस्मै नम इत्यर्थः अखंडो दुःखानवच्छिन्न अखंडोऽविनाशी वा आनंदविषयकबोधो यस्मात् तस्मै नित्यसुखा
भिव्यक्तिरूपमोक्षमीश्वराद्भवतीति हृदयं अखंडो दुःखानवच्छिन्न आनंदो यस्मात् तादृशो बोधो यस्य तस्मै षष्ठ्यर्थे रुविषयिते
त्यपिकल्पनात् निपुणेर्विभाव्येति निपुणाविभावनेन स्वयमेव दोषाः प्रयास्यंतीतिभावः संगतिप्रदर्शनप्रतिज्ञयोरर्थात
त्वं निबध्ना चिकीर्षुस्तयोः प्रकृतोपयोगितां दर्शयति पूर्वेत्यादिना अत्र च संगतिप्रदर्शनस्य फलमेकवाक्यताप्रतिपत्तिः प्र
तिज्ञायाः प्रयोजनं शिष्यावधानं तच्चोत्तरग्रंथप्रवृत्त्यनुकूलव्यापारत्वं तत्प्रवृत्त्यनुकूलवर्तमानकृतिसाध्यता ज्ञानप
र्यवसितं अस्ति चोत्तरग्रंथे पूर्वग्रंथसंगतार्थकत्वहेतुना पूर्वग्रंथेन सहैकप्रयोजनहेतुप्रतिपत्तिकत्वरूपस्य पूर्वग्रंथैक

वाक्यत्वस्यानुमानं तच्चोत्तरग्रंथस्येह साधनत्वपर्यवसन्नमतः प्रस्तुतप्रवृत्त्युपयोगितया संगतिप्रदर्शनस्यना
जा. र्थांतरत्वं एवं प्रतिज्ञा पुनरनुमान निरूपणोल्लंघ्यायावर्त्तमानकृतेः साध्यत्वं बोधयतीति उत्तरग्रंथे प्रवृत्त्युप
२ योगिवर्त्तमानकृति साध्यता ज्ञानस्य प्रयोजकमिति भावः अत्रव्याख्येयग्रंथस्य स्वरस समीलितस्यैव धर्म्म
मुचितत्वात् प्रत्यक्षेत्यपहाय प्रत्यक्षावेती सुक्तमिति भ्रमः दीधितिकृते व्याख्येयग्रंथस्य स्वरसः समीलिते
स्यैव धर्म्ममुचितत्वात् प्रत्यक्षानंतरमिति पक्षता ग्रंथस्य व्याप्तीति प्रकोरण ध्वनत्वात् तादृशनियमस्य संप्रदायासिद्ध
त्वात् परेतु नियमः क्वचिदेवं क्वचिदन्यथापि धारणमिति ध्येयं प्रत्यक्षानंतरमित्यस्य धारणनिरासायेत्यपिक
श्चित् अनुमानस्यैव प्रतिज्ञेयत्वेऽग्रेऽनुमितौ निरूपणमर्थांतरमतस्तस्यादतोनुमितिः अनुमानस्य च द्वयोरेव
निरूपणस्य प्रतिज्ञेयतामावेदयितुमाह अत्रचेति अत्र प्रत्यक्षोपजीवकत्वादिति ग्रंथे फलतः फलयोः
साक्षात्कारानुमित्योः स्वरूपतः प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावः प्रतिपाद्य इत्यर्थः तथाच मूले २
प्रत्यक्षपदस्य प्रत्यक्षप्रमिति तत्करणोभयपरतया नुमानपदस्य भावकरणव्युत्पत्त्यानुमितित

२स्वरूपयोः२ ४ प्रतिज्ञेयत्वे४

त्करणोभयपरतयाऽनुमितेस्तत्करणस्य च द्वयोरेव निरूपणस्य प्रतिज्ञा तत्त्वान्नानुमितौ निरूपणे र्थांतरत्वमिति भा
वः केचित्तु आचार्यमते नित्यस्य ज्ञानस्यादेरनुमानत्वात् वक्ष्यमाणानुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वा
भावात् फलत इति फलद्वयेत्यर्थः साक्षात्संबंधेन प्रत्यक्षोपजीवकत्वस्य संगतित्वाभावार्थं लिंगज्ञानस्यकर
णतावादिनो मणिकारस्य मतमालंब्योक्तं स्वरूपत इत्याहुः तन्न लिंगस्यानित्यत्वे सर्वत्रानुमितिकरणमित्या
दिग्रंथाविरोधात् ननूपजीवकत्वं न संगतिः अनंतराभिधानव्याप्यस्यैव संगतित्वात् अनुमित्युपजीवकत्व
स्य न तत्साक्षात्कारस्यानुमित्यनंतरमनिरूपिततया यस्य प्रमाणफलस्योपजीवकं यत्प्रमाणफले तन्निरू
पणानंतरं तन्निरूप्यमिति व्याप्तिविरहादत आह प्रत्यक्षफलस्येति अनुव्यवसायादरित्यादिपदेनानुमित्युप
नीतधर्मप्रकारकप्रत्यक्षादिपरिग्रहः नसर्वेति अयं घटइत्यादिप्रत्यक्षस्यानुमित्यनुपजीवकत्वादिति
तथाचोपजीवकत्वमात्रस्यानंतराभिधानव्याप्यत्वाभावेपि प्रमाणफलविभाजकोपाधिव्यापकत्वेति

शा.दे. शिष्टमुपजीवकत्वं तादृशानंतराभिधानव्याप्यमेवेतिस्यादेवोपजीवकत्वसंगतिरितिभावः ननुप्रमाणफलविभाज
कोपाधिव्यापकत्वविशिष्टसाक्षात्कारोपजीवकत्वं अनुमितावसिद्धं शाब्दपरामर्शादप्यनुमित्सुत्पत्तेः अनुमि
२ तित्वावच्छेदेन साक्षात्कारोपजीवकत्वाभावात् कुतोस्य संगतिरित्यत आह अनुमितयस्त्विति साक्षादिति
तथा चोपजीवकत्वं प्रयोज्यतामात्रं न तु नन्यथासिद्धत्वनियमघटितमपीतिभावः नन्वेवमुक्तस्यैवोपजीव
कताविशेषस्यानंतराभिधानव्याप्यत्वे प्रत्यक्षोपजीवकत्वादिस्युपजीवकतामात्रस्यव्याप्यताप्रत्यायकमूल
ग्रंथो विरुध्यत इत्यत आह पुरस्कृत इति अयंप्रमाणफलविभाजकोपाधिव्यापकत्वरूपोपजीवकता
त्कर्षो ग्रंथकृतापि तात्पर्यविषयीकृतः सामान्यशब्दस्य लक्षणया विशेषबोधकत्वादितिभावः परंपरयोपा
पजीवकत्वस्यापि संगतित्वे प्रमाणफलविभाजकोपाध्यवच्छिन्नोपजीवकत्वमपि न तादृशाभिधानव्या २
प्यं प्रत्यक्षप्रमितावनुमितेस्तादृशोपजीवकत्वेप्यनुमित्युत्तरं तदनिरूपणात् तत्कुतोस्य संगतिरित्यत

विशिष्टदर्स्य:४

शंकते यद्यपीति अदृष्टजननीमिति तत्प्रयोजिकामित्यर्थः समयः शक्तिः सकर्तव्यतादीत्यादिपदादिष्टसाध
नत्वादेः संग्रहः अयंभावः कार्यमात्रं प्रति अदृष्टस्य हेतुतया साक्षात्कारप्रभृत्यपि धर्मादिकं हेतुः तच्च स्वकारणीभू
तयागादिकं यागादिश्च स्वगोचरप्रवृत्तिं यागादिप्रवृत्तिश्च यागादिगतेष्टसाधनत्वधियं तादृशधीश्च वेदं
विना अनुपपद्यमाना वेदस्तत्पदानां शक्तिग्रहमपेक्ष्यते इदंपदमत्रशक्तं असतिरसत्यंतरे वृद्धैस्तत्रप्रयुज्य
मानत्वात् इत्याद्यनुमितिरूपशक्तिग्रहं विना वेदवाक्यादर्थावगमासंभवात् एवंप्रवृत्तिजनिकायागेमत्कृ
तिसाध्यत्वइतिधीरपि अनुमानिक्येव तदंतर्भावेन विधेः शक्त्यभावादिति इदंतुचिंत्यते यत्र शाब्दादि
दृकप्रत्येकपदार्थोपास्थितिसामग्रयैव शक्तिग्रहान्मत्कर्तव्यत्वादिग्रहात्प्रवृत्तिः तत्र साक्षाददृष्टजन्यप्रत्यक्ष
व्यक्तेरेवानुमित्युपजीवकत्वात्तत्कत्वमेवेसाद्धयुक्तमिति किंच यत्तदंतर्भावेन सामान्यव्याप्तौ
व्यभिचारेप्यसत्वेपि अनुमितिनिष्ठप्रत्यक्षोपजीवकत्वस्य तादृश्येपप्रत्यक्षानंतराभिधानव्याप्यत्व

देवतत्रसंसर्गतिलक्षणसंभवात् साक्षात्कारादावनुमित्युपजीवकत्वहेतोर्व्यभिचारदर्शनान्नौचित्यमितिदिक् न
आ. नु प्रत्यक्षमात्रस्यानुमित्युपजीवकत्वेपि तद्भिन्नमनुमित्युपजीवकत्वं न प्रमाणफलविभाजकोपाधिव्यापकं प्रमाण
४ फलविभाजकस्य साक्षात्कारत्वस्य नित्यज्ञानेपि सत्वादत आह ईश्वरेति तथाच जन्यसाक्षात्कारत्वं प्रमाणवि
भाजकं नतु साक्षात्कारत्वं नित्येश्वरज्ञानेतिप्रसंगात् नतद्व्यापकत्वविशिष्टमनुमित्युपजीवकत्वञ्च नानुमित्यनंतराभि
धानव्याप्यमतो व्यभिचारस्तादवस्थ्यमेवेतिभावः दृष्टेति दृष्टद्वारकत्वं तन्मात्रद्वारकत्वमदृष्टद्वारकत्वपर्यवसि
तं तेनादृष्टद्वारकस्यापि प्रत्यक्षादिरूपदृष्टद्वारकतया नोक्तदोषः तथात्वं प्रमाणफलविभाजकोपाध्यवच्छिन्न
मुपजीवत्वं इतरस्येति उक्तधर्मावच्छिन्नोपजीवकतामात्रस्याविनिगम्यत्वात् अनंतराभिधानरूपं यत्साध्यं ४
तदेववर्तते नतु तदभाववतीति विनिगमनाया अविषयत्वात् व्यभिचारत्वादिनियावत् यत्प्रमाणं यस्योपजी
वकं तत्तदनंतरं निरूप्यमिति व्याप्तेरनुमानोत्तरानिरूपितप्रत्यक्षप्रमाणव्यभिचारात् स्वरूपत उपजीवकत्वे

पि प्रमाकरणत्वावच्छेदकोपाध्यवच्छिन्नत्वेच व्याप्तेस्ताशयेनाह सर्वमिति व्याप्तिबुद्धीनामेवानुमानभावात् तासां
च सर्वासामेवमनःस्वरूपप्रत्यक्षप्रमाणाधीनत्वादितिभावः अनुमितिप्रमाकरणतावच्छेदकं व्याप्तिज्ञान
त्वं तदवच्छिन्नंच न प्रत्यक्षप्रमाणोपजीवकं व्याप्तिज्ञानत्वस्येश्वरबुद्धेरपि सत्वे रिति प्रकृतासिद्धिरत आह अ
नुमितीत्यादि भावयतो जनयतः तत्करणतेति अनुमितिकरणता निर्वाहिकाघ टिकायाप्रसक्तिः संबंध
जन्यत्वोवैशिष्ट्यरूपः तद्धिरहेणाहेतुत्वादनुमितिकरणत्वादिरित्यर्थः व्याप्तिज्ञानत्वं नानुमितिकरणतावच्छेद
कं तथा सति तत्वतो नित्यज्ञानस्य स्वरूपयोग्यतया ततोप्यनुमित्यात्मकफलावश्यंभावापत्तेः किंतु ज
न्यत्वविशिष्टव्याप्तिज्ञानत्वं तदवच्छिन्नं भवत्येव प्रत्यक्षप्रमाणोपजीवकमतो नासिद्धिरितिभावः अत्र कथितानु
मानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं संपाद्य प्रत्यक्षत्वावच्छेदेनानुमानोपजीवकत्वस्य व्यतिरेकमाह सर्वमिति ननु व्या
प्तिज्ञानत्वमेवाजनकतावच्छेदकं नित्यस्वरूपयोग्यस्येत्यादि व्याप्तेरप्रयोजकत्वात् प्रयोजकत्वं समवायादिकारणस्व
लीयत्वात् तत्रैव प्रत्यक्षत्वादृशव्याप्तेः सर्वत्रानुद्भावितत्वात् तथाहेतुत्वासिद्धिरत आह दृष्टद्वारेति दृष्टमात्रद्वारकं सर्वः
तथाच अदृष्टद्वारकस्य यत्प्रमाणं यदुपजीवकं तत्तदनंतरनिरूप्यमित्येव व्याप्तिः नतु प्रमाणतावच्छेदकोपाध्यवच्छि

जी॰श्री न्नत्वमनिवेश्यमितिभावः निरुक्तमनुमानोपजीवकत्वं प्रत्यक्षेतियतो व्यभिचारः स्यादित्याह, नचेति अग्रिमा क्रियेति
यंसूतरांनानुमानमपेक्षतइतिरत्नचितं अथादृष्टमद्वारीकृत्य यत्प्रमाणंयदुपजीवकं तन्नादंनंतरोनकस्य मित्यपि ने
५ व्याप्तिः यत्रचक्षुर्घर्षणाद्रसविशेषपानाद्वा पूर्वचक्षुर्नाशानंतरं चक्षुरंतरोत्पादः तत्रादृष्टद्वारकस्य घर्षणपा
नादिप्रयोजकतया तदिष्टसाधनत्वाद्यनुमानस्योपजीवके अनुमानानंतरा निरूपितेच खंडचक्षुर्घर्षपानाधीने
प्रकृष्टचक्षुषिव्यभिचारात् नचात्रोपजीवकत्वं जन्यतारूपमेव घटकमुक्तं किंतु चक्षुषानुमानप्रयोज्यत्वमे
वेतिदोषः तथासति अदृष्टाद्वारकत्वविशेषणवैयर्थ्यापत्ते रित्याशयेनशंकते अथेति उपजीवकमिति अदृष्टम
द्वारीकृत्येत्यादिः एवंकार्यमित्यत्रापि। क्वचिदिति यत्रोक्तप्रणाल्या चक्षुरंतरोत्पादः तत्रत्यकार्यमित्यर्थः प्रा
चेरनंतराभिधानव्याप्यस्यैव संगतित्वमिष्टमतस्तन्मतमनुसृत्यैवप्राक्प्रपंचितं वस्तुतः तादृशनियमात्संगतेरपि ५
नक्षतिः प्रत्यक्षोपजीवकत्वादित्यत्र पंचमीनहेतुतायां किंतु ज्ञानप्रयोज्यतायां सुखात्प्रवर्त्तते इत्यादौ तथा
व्युत्पत्ते रित्याशयेनपरिहरति किंचातदृश्यादि अनंतराभिधानव्याप्यस्यैव संगतिपदार्थत्वे तद्दोषतादवस्थ्यं अ
तोन्यथैव संगतिपदार्थं निर्वक्ति अनंतरेति यदभिधानानंतरं यदभिधानस्य प्रयोजिकायाजिज्ञासातज्जनक

ज्ञानविषयोयोर्थः सतत्रत्यस्य संगतिरित्यर्थः अत्रचप्रत्यक्षंकस्यचित्कारणमितिज्ञानोत्तरं प्रत्यक्षकार्यत्वेनसामा
न्यतः प्रत्यक्षकार्यज्ञानं ततः सामान्यप्रकारेणज्ञानस्यविशेषधर्मप्रकारकजिज्ञासाजनकत्वाद्विशेषतः प्रत्यक्षका
र्यज्ञानं भवत्वितीच्छा शिष्याणां सैवचकिमस्यकार्यमित्याकारा ततश्चविशेषतः प्रत्यक्षकार्यज्ञानस्येष्टस्यसाधनत
यानुमानादिरूपप्रत्यक्षकार्यबोधकानांवाक्यानांज्ञानात् तत्रेच्छा ततदृष्टस्य तादृशवाक्यस्यसाधनताज्ञानात्
सू॰५ कंठाभिघातेच्छा तेष्टस्यकंठाभिघातस्यसाधनताज्ञानात् कंठक्रियायामिच्छा ततः कंठक्रियायांगुरोः प्रवृत्तिः ततः
स्वकंठक्रियातदभिघातादिक्रमेण प्रत्यक्षकार्यात्मकानुमानबोधकवाक्यस्यानंतराभिधानरूपस्यनिष्पत्तिः प्र
त्यक्षानंतरमनुमानाभिधानस्य परंपरया प्रयोजिकायाः किंप्रत्यक्षकार्यमित्याकारकजिज्ञासायाः जनकंयत्प्रत्यक्ष
कार्यज्ञानमिच्छासाधनमित्याकारकं ज्ञानंतस्यविषयः प्रत्यक्षकार्यत्वमितितत्रलक्षणसमन्वयः जिज्ञासाजनकज्ञानवि
षयत्वमात्रस्यघटादावपिप्रसंगेनतेन प्रयोजकांतं जिज्ञासाविशेषणं प्रत्यक्षानंतरं अनुमानस्याभिधानेप्रयोजिकाप्र
त्यक्षकार्याभिधानेच्छापीति तज्जनकज्ञानस्यविषये प्रत्यक्षकार्याभिधानत्वेतिव्याप्तिरतोजिज्ञासानुसरणंप्रत्यक्ष
ज्ञानकार्यस्य यत्फलं सुखादि तद्गोचरज्ञानस्यापि तादृशजिज्ञासा ×दौ× प्रयोजकत्वात् तद्विषयसुखादावति

ज्ञा. व्याप्तिरतस्तादृशजिज्ञासायाः प्रयोजकत्वमुपेक्ष्य जनकत्वमुक्तं फलद्वयेवान्यथासिद्धस्य फलज्ञानस्यापत्येद्दं
प्रश्नेहेतुत्वात् तादृशजिज्ञासायाजनकफलेच्छाविषयफलादौ तथाप्यतिप्रसंगः अतोज्ञानपदं यत्रक्रमेणदंडच
६ क्रयोर्निरूपणानंतरं दंडस्यकिंकार्यमितिजिज्ञासया घटोनिरूपितस्तत्र दंडकार्यत्वमपिमे घटेचक्रस्यसंगति
स्यात् तत्र चक्राभिधानानंतरघटाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वात् अतउक्तमर्थद्धति तत
ज्ञानजन्यतद्विशेष्यकयथार्थस्मृतिप्रकारतापन्नद्धतितदर्थः तथाचोक्तस्थले दंडज्ञानेनैव दंडकार्यत्वप्र
कारेणघटस्मारितो नतुचक्रज्ञानेनेति नातिव्याप्तिः एवंचयत्रचक्रज्ञानोत्तरमेव दंडकार्यत्वप्रकारेणघ
टस्मृता तस्यनिरूपणं तत्र दंडकार्यत्वमपि घटेचक्रस्य प्रसंगरूपासंगतिर्भवत्येव नचयथार्थपदवैयर्थ्यं य
त्र दंडकार्यं किमितिजिज्ञासया भ्रमवशेन दंडोत्तरंगगनादिकं निरूपितं तत्रगगनादौ दंडकार्यत्वस्यसंगति ६
त्वापत्तेः नन्वेवंयत्र प्रथमतएवघटबोधेच्छयाघटस्यनिरूपणं तत्रकस्यापिसंगतिर्घटेनस्यात्त् इतिवा
च्यं इष्टत्वात्तदनंतरंनिरूप्यत्वस्यैव तत्संगतत्वनियमेन निरूप्यमात्रस्य संगतत्वनियतत्वात् यद्यपिन्वेवम

पित्र सक्षककार्यज्ञानेसाधनमित्येवं बोधस्यैव प्रत्यक्षकार्यं किमितिजिज्ञासायाः कारणत्वात्तद्विषये ज्ञानत्वादाविष्टसा
धनत्वादेश्चाति रमिष्टत्वाप्तिः तथापियद्धर्मविशिष्टविषयकज्ञानधर्मिकेष्टसाधनताज्ञानत्वेन तदनंतराभि
धानप्रयोजकजिज्ञासायांप्रतिजनकत्वंतादृशधर्मस्तस्यतत्रसंगतिरितिविवक्षितं अत्रचतदनंतराभिधानंप्रतिय
द्रूपेणाजिज्ञासायाः प्रयोजकंतद्रूपावच्छिन्नकार्यताप्रतियोगिकत्वमेवतादृशजिज्ञासाजनकत्वंवक्तव्यं तेनयत्र
कोघटः किंचद्रव्यमिति समूहालंबनजिज्ञासयानीलोघटइत्येवाभिधानंतत्रनद्रव्यत्वेतिव्याप्तिः नीलोघटइत्ये
वाभिधानंप्रतिकोघटइतिजिज्ञासत्वेनैव प्रयोजकत्वंतथातदवच्छिन्नंप्रति द्रव्यत्वविशिष्टविषयकज्ञानत्वेन
जिज्ञासाया अनंतराभिधानप्रयोजकत्वंतत्वमित्येवसम्यक् जनकज्ञानविषयत्वादिनिवेशोव्यर्थइतिवाच्यं
तस्यलक्षणांतरत्वेनयथासंनिवेशे वैयर्थ्यविरहात् अतएवतदनंतराभिधेयत्वनिहेसतितज्ज्ञानजन्य
स्मृतिप्रकारतापन्नत्वमित्येवसम्यक् इत्यपिसमाहितं नव्यास्तु अनंतराभिधानेसादेः स्वार्थधीद्वारानंत
राभिधानस्यप्रयोजिकानिवसायाजिज्ञासाप्रत्यक्षकार्यकमित्याकारातस्याजनकविषयाविषयोजन
कतावच्छेदकंयज्ज्ञानंतस्यविषयोविषयतावच्छेदकः प्रत्यक्षकार्यत्वमित्यर्थमितिवदंति यत्कार्यत्वाद्यन्यतम.

न्या.
७
त्वसंगतिर्हि यमितिनञ्. तदनंतरमनिरूपितेपि तत्कार्यत्वादेः संगतित्वापत्तेः किंच प्रमेयनिरूपणानंतरं प्रमेयवत्
किमिति जिज्ञासया यत्र प्रमेयवान् निरूपितः तत्र प्रमेयस्वरूपाप्रसंगसंगतावव्याप्तेः प्रमेयभेदाप्रसिध्यातद
न्यतमत्वस्य दुर्वचत्वादिति ध्येयं संगतिः षड्विधा तदुक्तमभियुक्तैः प्रसंग उपोद्घातो हेतुतावसरस्तथा निर्वाहकैक
कार्यत्वे षोढा संगतिरिष्यते इति तत्र निर्दिष्टोपपादकत्वमुपोद्घातः चिंतां प्रकृतसिध्यर्थामुपोद्घातं विदुर्बुधा इति
प्राचीनगाथायामपि चिंतापदं कृद्भिहितो भाव इति न्यायेन चिंत्यमानपरं तथा च तस्या अपि प्रकृतसिध्युपपाद
कतया चिंतनीयत्वं प्रकृतसिध्युपपादकत्वपर्यवसन्नमेवार्थः हेतुत्वं कारणत्वं अवसरोनंतरं वक्तव्यत्वं अनं
तरोद्दिष्टत्वं तयेति न्यायभास्करकृतः निर्वाहकः कारणता निर्वाहकं कार्यत्वमिति यावत् एककार्यत्वं एककार्य
धयोरिति व्युत्पत्त्या एककार्यत्वं प्रसंगत्वं तु संगतित्वे सत्युपोद्घातादिभिन्नत्वं स्मृतस्य उपेक्षानर्हत्वं प्रसंग इति ७
प्रवादेपि स्मृतत्वमनंतराभिधानप्रयोजकजिज्ञासाजनकस्मृतिविषयत्वं उपेक्षानर्हत्वं च प्रसंगलक्षणे
उपेक्षार्हा उपोद्घातादयः साधन्यत्वं तेन ततोपि प्रागुक्तस्यैवार्थस्य लाभ इति संक्षेपः कारणत्वस्य कार्य
त्वस्य वेति षष्ठ्यर्थः प्रकारत्वं तथा च कार्ये ज्ञाते कारणत्वप्रकारेण कारणस्य ज्ञानात् किमस्य कारणमिति

जिज्ञासा कारणे ज्ञाते च कार्यत्वप्रकारेण कार्यस्य ज्ञानात् किमस्य कार्यमिति जिज्ञासेत्यन्वयः कार्यकारण
ज्ञानयोस्तु कारणकार्यज्ञानजनकत्वमेकसंबंधिज्ञानस्यापरसंबंधिस्मारकतयेति भावः जिज्ञासेति तदुक्त
त्वं [illegible]प्रसधीजनकवाक्यत्वादिक्रमेण कार्याभिधानमिति शेषः इत्थं चेति संगतेरनंतराभिधानव्याप्यत्वा
घटितकार्यादिः तत्वे चेत्यर्थः तुल्यत्वेपीति तथा च व्याप्यतारक्षार्थं प्रागुक्तोत्कर्षो नादरणीयः प्रसक्तोपजीवक
त्वादिति पंचम्यां तु ज्ञानजन्यजिज्ञासाप्रयोज्यतायां न तु हेतुतायामिति भावः लाघवायेति संगतिप्रदर्शनस्य
यत्कृते एकवाक्यत्वानुमानत्वलाघवायेत्यर्थः अनुमानोपमाने पक्षीकृत्य समूहालंबनरूपएकवाक्यतासा
ध्यकानुमित्यपेक्षयोपमानधर्मिकैकवाक्यतानुमित्यंतरकल्पनायाः गौरवादिति भावः अनानुमानं वकुवादि
संमतत्वं कथं संगतिरत आह सुप्रसिद्धतयेति इष्टसाधनीभूतप्रतिपत्तिकतयेत्यर्थः सुप्रतिपदतया अनिष्टजन
कप्रतिपत्तिकत्वेन अत्र हेतुः निरसनीयेत्याद्युक्तिः तथा चानुमानप्रतिपत्ताविष्टसाधनतानिष्टाजनकत्वयोः सत्वा
तत्प्रतीत्सा तत्रेच्छोत्पत्तौ बाधकं नास्तीति भावः नोपमानमिति जिज्ञासेत्यनुषज्यते अप्रसिद्धत्वादिति येषामु
पमाने विप्रतिपत्तिस्तेषामुपमानज्ञानात्मनो धर्मिण एवासत्वात् कुत्रेच्छा स्यादिति भावः यस्योपमाने संम

जो. तिसस्याप्युपमानप्रतिपत्तौ बहुतरदुःखानुबंधित्वग्रहात्तज्जिज्ञासासंभवातीत्याह निरसनेति अतिदुरूह
त्वं बहुतरदुःखानुबंधिप्रतिपत्तिकत्वं ननु बहुतरदुःखानुबंधिन्यपि पदार्थेतरदृश्यदुःखे बलवद्दुःखाभा
८ वदशायां प्रथमं जिज्ञासा जायत एवेत्यत आह औत्सर्गिकमिति प्रायशो बहुतरदुःखजनकत्वग्रहदूषो
भवत्येवेति रीतिमनुरुध्येत्यर्थः तथाचेति प्रथममनुमानजिज्ञासोत्पत्तौ तन्निवृत्तौ उपमाननिरूपणमि
तिभावः ननु प्रतिबंधकीभूत जिज्ञास्यजिज्ञासानिवृत्तिरूपस्यावसरस्य नः संगतित्वं तत्प्रकारकजिज्ञा
सायामनंतरमभिधानादत आह यथाचेति अवसरस्य अवसरपदार्थस्याको पंचमतत्वबाधादौ
अनंतरवक्तव्यत्वमेवावसरः परं किंवक्तव्यमिति जिज्ञास्यैवानंतराभिधान लक्षणा व्याप्तिरिति
भावः अनंतरोद्दिष्टत्वमेवावसरः अत एवावसरतः शक्तिनिरूपणामिति परिशिष्टव्याख्या
नेन्यायभास्कर कृतोद्देश लक्षणाचात्र संगतिरित्युक्तमित्यपि केचित् सार्वभौममतमाह शब्दा ८
तरेति गोसदृशो गवयपदवाच्य इत्यातिदेशवाक्यार्थज्ञानस्य गवादिपदशक्तिग्रहं विनानुपपत्तेर्गो
पदं गविशक्तमसतिवसंतरेष्वदुःस्तत्र प्रसुत्क्तादिसनुमानापेक्षायाः उपमित्यात्मकस्य गवयादि
पदशक्तिग्रहस्यानुमानाधीनत्वात् पूर्वं तन्नापेक्षितमतः शब्दांतरेत्युक्तं गवयादिपदस्य निःशक्तित्वग्र
हनिश्चे देशवाक्यार्थज्ञानासंभवात् तत्प्रतिबंधार्थं गवयपदं किंचिद्वृत्तिमत् शक्तिमत्साधुपदत्वात् इत्येवं
विधमुपमितिविषयीभूतस्य गवयादिपदस्याभिधानं चानुमानं प्रागपेक्षितं भवतीत्याशयेनाह सत्प्र
त्तिनिवृत्तिकत्वेत्यादि ननु यत्र मनसैव गवयपदवाच्यत्वग्रहसहकृत सादृश्यज्ञानादुपमितिः तत्रो
पमानस्य वात्तचनुमानापेक्षितत्वान्निर्विकल्पमानोनुमानापेक्षितत्वं न संभवतीत्यत आह अंततइति
बहुवादीत्यादि ग्रंथतः तादृशसंगतिरलाभएवेति केचित् इत्यत्रोस्वरसः अथोपजीवत्वसंगतेरनंतरा
भिधाननियामकत्वापेक्षायामनुमानानंतरमेव प्रत्यक्षं किं ननिरूपितमत आह संभवतिचेति इत्प्रत्यक्षा
नुमानस्थल निरूपणमत्रज्ञानं न तु तदर्थकः शब्दः प्रत्यक्षबोधकशब्दस्यानुमानार्थकशब्दप्रत्येवहे
तुत्वात् तथाच प्रत्यक्षस्य प्रागकृतेनुमानधीरेवनस्यात् कारणं विना कार्यानुत्पत्तेः प्राक् प्रत्यक्षं नि
रूपितमिति भावः अनुमानत्वादिरूपेणानुमानज्ञाने व्यभिचारात् प्रत्यक्ष निरूपणेनानुमान निरूप
णे हेतुरत आह अथतत्पूर्वकमिति तथाच सामान्यतो व्यभिचारेपि प्रत्यक्षपूर्वकत्वेनानुमाननिरूपण

जा॰ प्रत्यक्षज्ञानजन्यं नवेतिभावः अथतत्पूर्वकमनुमानं त्रिविधं पूर्ववच्छेषवत् सामान्यतोदृष्टंचेतिसूत्रं अथप्र
९ त्यक्षानंतरमनुमानंनिरूप्यत इतिशेषः तच्चत्रिविधंतदाह पूर्ववदित्यादि पूर्वंकारणंतद्वल्लिंगंयथा
ज्ञानचिकीर्षादिहेतुनाप्रवृत्त्याद्यनुमानं शेषःकार्यंतद्वल्लिंगकंयथाधूमादिनावह्न्याद्यनुमानं का
र्यकारणभिन्नलिंगकंतु सामान्यतोदृष्टंपृथिवीत्वादिनाद्रव्यत्वादेरनुमानमितिवाचस्पतिमिश्रस्तु
दृष्टमितिसर्वत्रान्वितं यथाचपूर्वमन्वयसहचारः तद्वत्तया दृष्टंगृहीतंशेषोव्यतिरेकसहचारः तद्वत्त
यागृहीतंसामान्यतउभयसहचारः तद्वत्तयागृहीतमित्येवंत्रैविध्यविवरणमाह तद्भेदेन सौत्रेणाव्या
ख्यादीति व्याख्याद्धः प्रत्यक्षंयस्मादितिव्युत्पत्त्याप्रत्यक्षप्रमाणपरामर्शादित्यर्थः यथाश्रुतेत्व्याप्त्यादिः
साक्षात्कारपूर्वकत्वेनानुमानफलानुमितिनिरूपणस्यसूत्राकांक्षापिप्रत्यक्ष[illegible]णनिरूपणस्या
नुमाननिरूपणहेतुत्वालाभात् असंगत्यापत्तेः नव्यास्तु प्रत्यक्षफलानुमानफलयोःक्रमेणनिरू ९
पणेनियामकाकांक्षायामाह संभवतिचेति तत्पूर्वकमित्यादिसूत्रे चानुमानपदंभावव्युत्पत्त्या
नुमितिपरं एवंचव्याख्यादिप्रत्यक्षेतियथाश्रुतमेवसम्यगितिप्राहुः नन्वेतावतोसौत्रक्रमस्यो

पपादितत्वेपिस्वकृततत्कृतग्रंथक्रमान्नोपपादितइत्यतआह अत्रापीति अनुमानखंडेपीत्यर्थः संचारेति
अत्रप्रत्यक्षत्वमिंद्रियसंनिकर्षजन्यज्ञानत्वरूपंप्रत्यक्षमप्युपयुक्तं ग्राह्यं ननुसाक्षात्कारत्वरूपं तथास
तिप्रत्यक्षप्रमाणनिरूपणस्यानुमाननिरूपणहेतुत्वापत्तेरित्यवधातव्यं तन्निरूपणात् अनुमाननि
रूपणात् तस्यचेति प्रत्यक्षपूर्वत्वेनसप्रत्यक्षजन्यत्वेनचानुमाननिरूपणस्येत्यर्थः अनुमानोपमानयो
रपिक्रमेणानिरूपणेकार्यकारणभावएवनियामकइत्यतआह एवमितिसंभवति अथानुमानप
देनभावव्युत्पत्त्यानुमितेरपिनिरूप्यत्वेनप्रतिज्ञानत्वात्तत्रैसत्रतद्भेदेनानुमितेःपरामर्शेनुमितेरनु
मितावविशेषणत्वात् सप्तम्यर्थसंगतिरतःकरणव्युत्पत्त्यालब्धमनुमानमेवपरामृश्यव्याचष्टे
तत्रेति निरूपणीयइति प्रकारांतरेणव्याप्तिज्ञानत्वानुमितिकरणत्वादिनानिरूपणीयमनुमानंव्या
प्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वप्रकारेणानुमितेरविशेषणत्वात् तत्रसत्रसप्तम्यर्थतादृशविशेषण
त्वमुपपादयितुंमध्येपूरयतिलक्षणस्वरूपप्रामाण्यादिभिरितितत्तियार्थः प्रकारिता आदिना विभागादि

जा॰ परिग्रहः तत्करणमित्यादिना लक्षणस्य तच्च लिंगेत्यादिना स्वरूपस्याथानुमानमित्यादिना प्रामाण्य
स्य च निरूपणं यदनुमानं निविष्टं तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनैवानुमितेर्विशेषणत्वा
१० त्वात्संगतिरितिभावः न व्याप्तीत्यादिग्रंथासंगतिः ननु प्रागुक्तक्रमेणानुमित्यनुमानयोर्द्वयोरेव नि
रूपणस्य प्रतिज्ञातत्वादनुमाननिरूपणपूर्वमेवानुमितिः कथं निरूपितेत्यत आह करणस्येति क्रि
यायायोगे भेदे व्यावर्त्तकधर्मविशेषो व्याप्त्यादिज्ञानजन्यज्ञानत्वरूपानुमितीत्यादिसोनभिन्नाघटि
ताकृतिः शरीरमनुमितिकरणत्वादिरूपं यस्य तादृशजन्यत्वमित्यर्थः तथा च विशिष्टबुद्धेर्विशे
षणज्ञानं विनानुपपत्त्या पूर्वमनुमितिनिरूपितेतिभावः प्रांचस्तु ननु अनुमानस्य निरूप्यत्वेन प्र
तिज्ञातत्वादनुमितिरितितं निरूपणमर्थांतरमत आह करणस्येति यवतारयंति तन्मंद ता १०
वताप्य नुनितिकरणमानिरूप्यत्वद्धटिकायाः प्रथमतानिरूपणोऽप्राप्तकालतापत्तेः स्यात् किंच
व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरत्वेनानुमाननिरूपणे हेतुभूतस्य व्याप्त्यादिज्ञान

जन्यज्ञानत्वस्यानुमितिज्ञानस्य संपत्त्यर्थमेव यदि प्रागनुमितेर्निरूपणं तर्हि व्याप्तिविशिष्टपक्षधर्मताज्ञानज
न्यं यज्ज्ञानं तत्करणमनुमानमित्येवमणिकारो ब्रूयात् तावतैव विशेषणज्ञानसंपत्तेः कृतमनुमित्याक्षिल
पेन अत्रे चोपजीव्योपजीवकभावश्चेत्यनेनार्थांतरनिरासादितितु नवाच्यं तस्य प्रकारांतरेण संगमादिति
दिक्कर — आह मणिकारस्तु नवान् व्याप्तीतिस्वातंत्र्येण पाठधारणं यथाश्रुते व्याप्तीत्यनेन क्रियालक्षण
स्यैवोक्तत्वादसंगतेर्लक्षणमित्यनंतरं वक्तुमितिपूरणीयं आह अनुमितिलक्षणमाहेत्यपि कश्चित् क्रिया
लक्षणपूर्वकमनुमानरूपक्रियाविशेषलक्षणपूर्वकमितिकः स्वार्थे तथा चानुमानलक्षणपूर्वमित्यर्थः
तल्लक्षणमाह अनुमितिलक्षणमाह कुचिदकांक्षावैचित्र्येण समासस्यैकदेशे स्थापितत्वदेनपरामर्षा
दितितु नव्याः व्याप्तीत्यादिरित्येव पाठः इत्यन्ये व्याप्तीत्यत्र इति शब्दादेव आदिपदार्थबोधकत्वमित्यपरे तयोः
संम्यक्त्वमेव यदि ह्यतग्रंथस्य पुनर्धारणं संप्रदायसिद्धमिति संक्षेपः यद्रूपस्तुपाध्यायमतमुत्थापयति
अत्रेति अर्थद्वलिपरेणान्वयः व्याप्तीति व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्यं संसर्ग
मर्यादया यत्र वर्गाह्नत्व वह्निव्याप्तिवैशिष्ट्यवत् पर्वतवैशिष्ट्यधूमेद्रसाकारकं ज्ञानं तज्जन्यत्वमर्थः पद

जो॰ दे॰ र्थतावच्छेदकेति नन्वक्रांतविशिष्टपदस्य वैशिष्ट्याश्रयबोधकत्वात् व्याप्तिवैशिष्ट्याश्रयत्वमेव पदार्थता
वच्छेदकं तत्प्रकारकं च ज्ञानं नोपाध्यायमते हेतुरितिवाच्यं भावविदितक्रांतस्य विशिष्टपदस्य वैशिष्ट्य
१२ परतया व्याप्तिवैशिष्ट्यं यत्रेति व्युत्पत्त्या व्याप्तिविशिष्टस्यैव व्याप्तिविशिष्टपदार्थतावच्छेदकत्वादितिभावः
वचनत्वादिति सामानाधिकरण्यसंबंधेन विशेषणतावच्छेदकविशिष्टस्य विशेष्यतावच्छेदकस्यैव कर्म
धारयोत्तरभावप्रत्ययार्थत्वादितिभावः इत्थं च नीलोत्पलत्वमित्यादौ तादृशसंसर्गेण नीलत्ववदुत्पल
त्वस्यैव तादृशभावप्रत्ययार्थस्य प्रकृत्यर्थे नीलोत्पलेन्वयात् नीलोत्पलीयं नीलत्ववदुत्पलत्वमित्यन्व
यबोधः तेन तादृशभावप्रत्ययस्य यदि सामानाधिकरण्यत्वेन शक्तिस्तदा पदार्थतावच्छेदकयोरेक
देशतया तत्रान्वयासंभवः यदि च तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन शक्तिस्तदा तादृ १२
शसामानाधिकरण्यस्याप्यवच्छेदकद्वयमात्रवृत्तित्वात् प्रकृत्यर्थस्य तत्रानन्वयप्रसंगः कथंचिदवच्छे
दत्वादिसंबंधेन प्रकृत्यर्थे तत्रान्वयसंभवेप्युत्पलत्वे नीलोत्पलत्वमित्यादिव्यवहारप्रसंगः तादृ
शसामानाधिकरण्यस्योत्पलत्वेपि सत्वात् नीलोत्पलत्वं न समवेतमित्यादिव्यवहारापत्तेश्चेत्या

दिकं समाहितं यत्तु तत्तद्विशेषतावच्छेदकभेदादनंतशक्तिकल्पनापत्तेर्न कर्मधारयोत्तरभावप्रत्ययस्यानुरूपेण
शक्तिः किंतु वृत्तित्वमात्रे तथा च नीलोत्पलत्वमित्यादौ भावसामान्यशक्त्योपस्थापितस्योत्पलत्वादेर्नीलान्वितवृत्ति
त्वेन सहान्वयो नीलवृत्त्युत्पलत्वं वाक्यार्थ इति तन्न नीलोत्पलत्वमित्यादौ नीलोत्पलयोरभेदानुभवस्यापलापाप
त्तेः वस्तुतो घटत्वमित्यादौ घटेतरावृत्तित्वे सति सकलघटवृत्तित्वेन रूपेण घटत्वस्यानुभवः सर्वसिद्धः तत्र घटस्य घ
टपदादेव लाभादितरावृत्तित्वादौ भावप्रत्ययशक्तिः तत्रापि इतरत्वमाश्रयो वृत्तिमान् साकल्यं घटकीभूतप्रतियोगि
त्वमवच्छेदकत्वं च प्रत्येकमेवार्थः तथा च प्रकृत्यर्थस्य घटस्येतरत्वे तस्य चाश्रये आश्रयवृत्तिमति वृत्तिमतः पुनरितरत्वे
न्वयात् घटेतरावृत्तित्वलाभः एवं प्रकृत्यर्थस्य घटस्य वृत्तिमति तस्य चेतरत्वे इतरत्वस्य प्रतियोगित्वे प्रतियोगित्व
स्य चावच्छेदकेवच्छेदकस्य च पुनरितरत्वे अन्वयात् घटवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकभिन्नत्वरूपस्य सकलघट
वृत्तित्वस्य लाभः व्युत्पत्तिवैचित्र्याच्चैकपदार्थानां परस्परमन्वयः न च विशिष्टस्यापदार्थत्वे प्रथमं विशिष्टवैशिष्ट्यान्व
यबोधानत्वापादितिवाच्यं इष्टत्वात् क्वाचित्कस्य प्रथमविशिष्टवैशिष्ट्यबोधस्य विशिष्टलक्षणादितोप्युपपत्तेः प्रकृत्य
र्थतदवच्छेदकस्य यादृशसंबंधो भासते तादृशसंबंधावच्छिन्नत्वं वृत्तिमत्वादिकं ग्राह्यं तेन घटत्वादिजातेः कालिकादि
संबंधेन घटेतरवृत्तित्वेपि न क्षतिः न वा विषयितादिसंबंधेन घटत्ववत्तौ भेदस्य घटवृत्तित्वेपि घटत्वादे घटवृत्त्यन्योन्या

ज्ञानादेः

जा॰ दे॰ भावप्रतियोगितावच्छेदकत्वहानिः सत्वं प्रमेयत्वमित्यादौ सदितरावृत्तित्वादेर्भानं अप्रसिद्धत्वात् किंतु सद्वृत्तित्वेदप्रतियोगि
तानवच्छेदकत्वादिरूपसकलतद्वृत्तित्वादिमात्रमानं वस्तुतः सदितरत्वावच्छेदेन वर्तमानस्य भेदस्य प्रतियोगितावच्छेदकत्वमेव स
१२ दितरावृत्तित्ववाच्यं तद्व्यवसायात्मकमेव नचैवमपि घटत्वमित्यादितोऽभावस्य गगनादेर्भानप्रसंगः स्वातंत्र्येणापि वृत्तिमतोऽ
न्वयादिति एवं च नीलोत्पलत्वमित्यादौ कर्मधारयस्थलेऽपि नीलाभिन्नोत्पलस्य भावप्रत्ययार्थेन सहान्वये नीलत्वसमवायि
समवायरूपस्य पदार्थतावच्छेदकसामानाधिकरण्यस्य भानं संभवत्येव नचोक्तरीत्या भावप्रत्ययस्य शक्तिकल्पने गुरुत्वमि
त्यादितो रसवत्वस्य संयोगवत्वमित्यादेर्नो द्रव्यत्वस्य तद्रूपवत्वमित्यादितो तद्रसवत्वस्य च प्रतीत्यापत्तेः प्रकृत्यर्थतावच्छेदकनि
रूपितवृत्तित्वविशिष्टप्रकृत्यर्थावच्छेदकताघटकसंबंधेन वृत्तिमत्वस्यैव शक्यवर्गप्रवेशे तु तत्पृथ्वीत्वादिखिलातिप्रसंगभंगादिति
वृत्तित्वादौ शक्तिकल्पनायां मानाभाव इति वाच्यं तादृप्येणानुभवानुरोधेन तत्र शक्तेः कल्पनात् अव्यावर्तकस्यापि शक्य
तावच्छेदकत्वादिति संप्रदायः केचित्तु धर्मित्वेनैव धर्मे भावप्रत्ययस्य शक्तिः तत्र च प्रकृत्यर्थतावच्छेदकनिष्ठाधेयत्वसंबं
धेनैव प्रकृत्यर्थान्वयस्य च व्युत्पन्नत्वात् घटत्वमित्यादिनो न द्रव्यत्वादेर्भानं न वा पटादौ घटधर्मस्य द्रव्यत्वादेः सत्वेऽपि पटादौ घट १३
त्वं नास्तीति वाक्यस्यायोग्यत्वमित्याहुः तत्तुच्छं घटे घटत्वमित्यादि वाक्यस्य निराकांक्षत्वापत्तेः घटधर्मत्वावच्छिन्नघटवृ
त्तित्वापत्तबुद्धेः उद्देश्यतावच्छेदकविधेययोरैक्यस्यादृश्यकत्वात् न व्यास्तु घटपटत्वमन्यत्वमित्यादिमुख्यप्रत्ययसंभवा

लाघवेन घटत्वादिकं जातित्वादिकं मखंडोपाधिश्च भावप्रत्ययस्य शक्यतावच्छेदकं घटत्वमित्यादौ घटत्वादिप्रकारेण लक्षण
येव बुद्धिरित्याहुः तन्न तथा सति घटवत्वमित्यादौ प्रकृत्यर्थघटवदादेर्भावार्थघटाद्यावाधेयत्वसंबंधेनान्वयस्यानुप
पत्तेः घटादिविशिष्टघटादेरिव घटादौ घटादिमद्वृत्तित्वस्यान्वयनिराकांक्षत्वात् घटवान् घटवान् इत्यत्रेव घटवति घट इत्यादा
वन्वयबोधानुत्पादस्य सर्वसिद्धत्वादिति संक्षेपः ननु वह्निव्याप्यवैशिष्ट्यवत्पर्वतवृत्तिताव द्रव्यत्वमित्येवं परामर्श
जन्यानुमितावव्याप्तिः तत्र व्याप्तिविशिष्टत्वसामानाधिकरण्यपक्षधर्मताया द्रव्यत्वेऽभावादत आह ज्ञानेति भ्रांता
नुमितिः भ्रांतस्यानुमितिः तथा च तत्र व्याप्तिविशिष्टत्वसमानाधिकरणं यत्सर्वतवृत्तित्वं पर्वतरूपादौ प्रसिद्धं तस्य द्रव्य
त्वादावारोपमादाय लक्षणसंगमनमिति भावः ननु कांचनमयपर्वतो वह्निमानित्याद्यनुमितौ अव्याप्तिः तादृशपक्षवृ
त्तित्वाप्रसिद्धेरत आह ज्ञानपदेति तथा च वह्न्यादिव्याप्तिविशिष्टत्वसमानाधिकरणतत्तद्धर्मवृत्तितायास्तत्तद्रूपावच्छिन्न
वृत्तित्वेन ज्ञानजन्यज्ञानत्वं तत्तद्रूपावच्छिन्नतत्तद्धर्मिकवह्न्यादिसाध्यकानुमितेर्लक्षणमिति भावः यत्तु ह्रदो वह्नि
मान् धूमादित्यादौ व्याप्तिविशिष्टत्वसामानाधिकरण्यह्रदधर्मत्वाप्रसिध्या तद्ज्ञानासंभवादव्याप्तिरत उक्तं ज्ञानपदे
त्यादि तत्तुच्छं तत्र तादृशसामानाधिकरण्याप्रसिध्या तद्ज्ञानसंभवस्यानुपदवक्ष्यमाणत्वेन संदर्भविरोधात् केचि

जो. नु बाधिताबाधितसाधारण्ये सस्य सदसत्साधारणेत्यर्थः तथाच सदुपरागेणासतो भानस्वीकारात्स्वीकारादस
१२ देवसामानाधिकरण्यमादाय ह्रदो वह्निमानित्यनुमित्यव्याप्तिनिरासकाभिप्रायको ग्रंथ इत्याहुः परे तु यत्र वह्निव्याप्ति
विशिष्टत्ववत् गुणसंयुक्तवान् धूम इत्यादिपरामर्शात् गुणो वह्निमानित्यनुमितिः तत्राव्याप्तिः गुणसंयुक्तत्वरूपस्यप
क्षधर्मत्वस्याप्रसिध्या तद्रूपेणानासंभवादत आह ज्ञानेति बाधिताबाधिते सस्य सदसत्साधारणस्य पक्षधर्मत्व
स्य ज्ञानलाभादित्यर्थ इत्याहुः तन्मंद सदुपरागेणासतः संसर्गमर्यादयैव भानस्वीकारात् प्राचीनसंमत
त्वेन प्रकारविधयापि अलीकस्य गुणसंयुक्तत्वादेर्भानासंभवात् अन्यथा परमताविशेषप्रसंगादिति नव्यास्तु
ननु बाधकालीनस्य परामर्शस्यानुव्यवसाये इतिव्याप्तिः न च बाधज्ञाने बाधितत्व विशेषणं यत्प्रामाण्यज्ञानविशि
ष्ट बाधकालीनपरामर्शजन्यानुमितौ अव्याप्तिप्रसंगादत आह ज्ञानेति बाधिताबाधितेति बाधिताबाधित
साधारणपरामर्शत्वेनज्ञानस्य कारणत्वलाभादित्यर्थः तथाच तादृशकारणत्वलक्षणेनिविष्टमिति नातिव्याप्तिः
अतएव बाधितमपि साध्यं संगच्छत इति प्राहुः केचित्तु चरमज्ञानपदस्य प्रमापरत्वे भ्रमानुमितौ भ्रमपरत्वे च प्रमानुमि
तावव्याप्तिरत उक्तं ज्ञानेति क्रमेण अवतारिकामाहुः तच्चिंत्यं तादृशपक्षधर्मतायाः ज्ञानमात्रनिवेशे धूमवान्प २२
र्वत इत्यादिज्ञानजन्यबुद्धावपि अतिव्याप्तिः अतस्तादृशसामानाधिकरण्यावगाहि ज्ञानं निवेश्यमित्याशयेन

दूषयति परामर्शेनेति अनुमितिजनकज्ञानेनेत्यर्थः नियत इत्यादि तथाच वह्निव्याप्तिसंबंधवत्पक्षसंबंधवान् धूमो वह्नि
व्याप्यधूमवांश्च पर्वत इत्यादिसमूहालंबनजन्यानुमितौ लक्षणासत्वेपि वह्निव्याप्यधूमवान्पर्वत इत्यादिधीजन्यपर
मानुमित्यव्याप्तिरितिभावः ननु व्याप्तिसंबंधविशिष्टपक्षसंबंधनिश्चयत्वेन हेतुत्वात् उक्तस्थले अनुमितेरेवाप्रसिध्या
कुत्राव्याप्तिरत आह गौरवेणेति लाघवात्पक्षे व्याप्तिवैशिष्ट्यनिश्चयत्वेन पक्षे वा व्याप्तिविशिष्टवैशिष्ट्याव
गाहिनिश्चयत्वेन हेतुत्वादितिभावः ननु ताद्रूप्येण हेतुतायास्तु तथाप्यनुमितिहेतुपरामर्शस्य पक्षधर्मिकव्याप्तिवि
शिष्टवत्ताज्ञानत्वादिनो व्याप्तिविशिष्टत्वपक्षधर्मत्व सामानाधिकरण्यावगाहित्वानुमानादवश्यमुभयसामाना
धिकरण्यावगाहित्वमतो न कुत्राप्यनुमित्यव्याप्तिरत आह संबंधेति व्याप्तिसंबंधत्वपक्षसंबंधयोः संबंधाग्र
ह इत्यर्थः विशिष्टज्ञानस्य पक्षधर्मिकव्याप्तिविशिष्टज्ञानस्योपपादित्वादिति यत्र वह्निव्याप्यवानयमिति शाब्द प्र
मानादिति परामर्शादनुमितिरित्यादिग्रंथेन मूलकृतैवोक्तत्वादित्यर्थः तथाच तादृशपरामर्श एव व्यभिचारा भोक्तक्रमेणानु
मानादितिभावः प्राचस्तु ननु व्याप्तिविशिष्टबुद्धित्वेन व्याप्तिसंबंधावगाहिबुद्धित्वे व्याप्तितत्संबंधादिसमूहा
लंबनादप्यनुमित्यापातात् किंतु व्याप्तिसंबंधसंबंधावगाहित्वमेव तत्कृतौ लाघवमत आह संबंधेत्यादि

तद्विशिष्टबुद्धित्वं तत्प्रकारताकज्ञानत्वं ननु पूर्वोक्तसंबंधसंबंधावगाहित्वं संबंधसंबंधावगाहिसमूहालंबने अतिप्रस
जा० क्तत्वात् अन्यथा दंडीपुरुष इत्यादितो दंडपुरुषसंयोगा इत्यस्या वैलक्षण्यापत्तेः प्रकारिता च विषयताविशेषः
२४ स च स्वरूपसंबंधविशेषः पदार्थांतरं वा अत एवाधिकरणाभावयोः संबंधस्य स्वरूपानतिरेकेपि तदीयसमू
हालंबनविशिष्टबुद्ध्योर्भेदः न च तुल्यविषयकत्वेपि विषयितावैलक्षण्येन बुद्ध्योर्भेदे साकारवादापत्तिरिति वाच्यं
बाह्यवस्तुनः प्रामाणिकतया अपह्नोतुमशक्यत्वादित्यादि बौद्धाधिकारटिप्पण्यां स्वयमुक्तत्वादिति मतांत
रमिदं विशिष्टबुद्धेः संबंधसंबंधावगाहित्वमतेपि व्याप्तिविशिष्टबुद्धित्वापेक्षया व्याप्तिसंबंधविशिष्टबुद्धित्व
स्य गुरुतया तुल्यत्वयोगादिति नव्यास्तु ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानं नानुमितिजनकं व्याप्तिसंबंध
पक्षसंबंधयोः सामानाधिकरण्यावगाहिता कान्यत्वादित्यनुमानादुक्तगौरवं प्रामाणिकमेवेत्यत आह सं
बंधेत्यादि व्याप्तिसंबंधपक्षसंबंधयोः सामानाधिकरण्याग्रहेपीत्यर्थः विशिष्टज्ञानत्वस्य विशिष्टज्ञानत्वेय २४
त्रेति व्युत्पत्त्या अनुमितिजनकीभूतविलक्षणज्ञानस्योपपादितत्वात् मिश्रादिभिरुपपादितत्वात् इत्याहुः
ननु व्याप्तिविशिष्टत्वसामानाधिकरण्यपक्षधर्मताया विशिष्टवैशिष्ट्यनिरूपितविषयताविशेषेण ज्ञान

पदार्थेन्वयाद्विलक्षणज्ञानलाभात् न वह्निव्याप्यधूमवान् पर्वत इत्यादिधीजन्यप्रमानुमित्यव्याप्तिरत आह भ्रमस्थल इति
तद्ज्ञानेति व्याप्तिविशिष्टसामानाधिकरण्यपक्षधर्मत्वज्ञाने इत्यर्थः तथा च ह्रदो वह्निमानित्यादिभ्रमानुमित्यव्याप्ति
रिति भावः अथासदेव वह्निव्याप्तिविशिष्टत्वसामानाधिकरण्यं ह्रदे शनैस्तं भ्रमस्थलेप्रसिद्धमत आह असदिति
आलोकेचक्षुःसंनिकर्षादेः व्यापकादेः शक्त्यादेश्च विरहेण प्रत्यक्षादिप्रमाणात् असतः ख्यातिसंभवात् सर्वेषां सत्वव्या
घातात् विनापि प्रमाणव्यापारं तदभ्युपगमे च शशविषाणादिप्रतीतिदशायां वंध्यासुतादेरपि ग्रहप्रसंगात्
अगृहीतशशादिपदशक्तिकस्य पुंसः शशविषाणमित्यादिप्रतीत्यनुपपत्तिलाकुक्त शशादिविषाणतामादत्सप्र
महेनैव तादृशप्रतीत्युपपत्तावतिरिक्तोऽखंडालीकविषयत्वे मानाभावात् शश विषाणयोः संबंधोऽलीक इत्या
दिव्यवहारस्यापार्थकत्वात् शशविषाणमसदित्यादिस्थले चासत्त्वं ह्यस्यास्तित्वाभावप्रतियोग्यर्थकत्वादिति भा
वः न चासतोऽप्रसिद्ध्या तत्ख्यातिनिषेधस्यायोगः तदीयसंसर्गत्वावच्छेदेन तत्प्रमात्वघटकत्वोपगमेनार्थतः
तन्निरासात् नव्यास्तु लिंगासंसर्गाग्रहो लैंगिकासंसर्गाग्रहस्यापेयत्वात् भ्रमस्थले नुमित्यनुत्पत्तेः कु
त्राव्याप्तिरत आह असदिति असतः प्रमापरामर्शादनुत्पन्नस्य ख्यातिनिरासादनुमितिभिन्नत्वनिरासा

जा॰ द्विति वदंति लक्षणाव्याप्तिमुक्त्वा लक्षणावाक्यतः शाब्दबोधोप्यनुपपन्न इत्याह अवांतरेति अयोग्यतासंशयस्याप्रति
बंधकत्वादुक्तं निश्चयइति तथाच फदधर्मतानव्याप्तिविशिष्टत्वसामानाधिकरण्येति अवांतरवाक्यार्थयोग्यत्व निर्णये ता
२५ दृशपक्षधर्मतायाः नज्ञानपदार्थेन्वयः संभवतीतिभावः अत्रैव दृष्टांतयति विषाणइति विषाणत्वावच्छेदेनेत्यर्थः श
शसंबंधेति शशविषाणेत्यत्र तत्पुरुषशशपदेन लक्षितस्य शशसंबंधिनस्तादात्म्येन विषाणेऽन्वये शशसंबंधिभे
दग्रहस्यैव शशसंबंधाभावग्रहस्यापि स्वतो विरोधित्वात् शशसंबंधाभाववत्त्वस्यैव वा शशसंबंधेनाभाव इति व्युत्प
त्त्या शशसंबंधावच्छिन्नप्रतियोगिताकोभेदोर्थः तथाविषाणजन्यमिदं कार्मुकमितिवाक्यस्थलीयान्वयबोधाभिप्रायेणे
दं निपातार्थस्य शशसंबंधादेः साक्षादेव विषाणादिनामार्थेन्वयसंबंधत्वादिति तु परमार्थः वैय्याकरणमते शशवि
षाणमित्यादिवाक्यतः शशसंबंधवद्विषाणमित्याकारकोबोधस्तेषुतु विभक्त्यर्थप्रतिसंधानस्यान्वयसहकारि
तस्वीकारात् नामार्थयोर्भेदेनान्वयबोधस्य समासातिरिक्तस्थलेएवाव्युत्पन्नतया मणिकृन्मतेपि शशपद
स्य शशसंबंधपरतया वा तादृशएव बोध इति तु नव्याः नञ्भावानुरोधेनासमानाधिकरणस्यापि विरोधित्वमित्य २५
पि कश्चित् अपरे तु शशस्य संबंधो यत्रेति व्युत्पत्त्या शशसंबंधाभाव इत्यनेन शशसंबंधिभेदस्य लाभेन यथाश्रु
तमेव सम्यगितिप्राहुः तोत्रेत्र नचेति वाच्यमितिपरेणान्वयः प्रमैवेति प्रकृतपक्षधर्मिक प्रकृतसाध्यक

प्रमानुमितिरेवेत्यर्थः तेन ह्रदो वह्निमानित्यादि भ्रमानुमितेरप्यंशात् प्रमात्वेपि नक्षतिः प्रमादेर्यस्य भ्रमसामान्यभिन्नत्वार्थकत्वे
ह्रदः पर्वतश्च वह्निमानित्यादि समूहालंबनानुमितेरप्य--त्वापत्तेः इष्टापत्तौ चोपाध्यायमतेपि तादृशसमूहालंबनानुमितौ व
वातिप्रसंगसंभावादग्रेयदि चेत्यभिधानस्य सदर्थविरोधादितिभावः साल्लिंगपरामर्षादित्यत्र साल्लिंगपरामर्षादि
मात्रादित्यर्थ इत्यपि वदंति ननु भ्रमस्यालक्ष्यत्वे पृथिवीत्यादिहेतुतायां गंधप्रागभावावच्छिन्न घटोगंधवानित्या
दि भ्रमानुमितौ महानसीयेतरवह्निबाधसहकृतयथार्थपरामर्शज्ञायमानायां पर्वतो महानसीयवह्निमानि
ति भ्रांतानुमितौ चातिव्याप्तिरत आह यदि चेत्यादि पक्षतावच्छेदकसामानाधिकरण्येनैव गृहीतव्यापकतावच्
छेदकरूपेणैव च पक्षे साध्यस्यानुमितिरित्युपाध्यायमतमालंब्योक्तं यदिचेति प्रथमज्ञानपदस्य प्रमापरत्वं तद्वि
षतादवस्थमतश्चरमेति प्रमापरमिति प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्ताप्रमापरमित्यर्थः तेन ह्रदो वह्निमा
न्पर्वतश्च वह्निमान् इति प्रमानुमितेरंशतो भ्रमत्वेपि न तत्राव्याप्तिता दवस्थत्वं यत्र व्याप्तिविशिष्टत्वसमा
नाधिकरणपक्षधर्मत्वस्य हेतौ न भ्रमः किंतु पक्षधर्महेतौ व्याप्यत्वमात्र व्याप्यत्वं वा हेतौ पक्षधर्मत्वमात्रस्य
भ्रमः तादृशपरामर्षजन्यप्रमायामव्याप्तिमाह अव्याप्येत्यादिना वस्तुतो वक्ष्यमाणया तथाच वह्नि
व्याप्यद्रव्यत्ववान् तादृशमहानसत्ववान् पर्वत इत्याकारकः परामर्शः यत्र द्रव्यत्वं तमेव पक्षधर्मत्वं

ना महानसे गतमेव व्याप्यत्वं विषयीकरोति तत्र साध्या पर्वतो वह्निमानिति प्रमायां अव्याप्तिरितिभावः ननु अनुमितिमात्र
स्यैव साध्यव्याप्यवत्पक्षावगाहित्वादुक्तस्थलीयानुमिति लिंगांशे भ्रमरूपैव सा च न लक्ष्या भ्रमसामान्यभिन्नत्वरू
१६ पस्यैव प्रमात्वस्य लक्ष्यलक्षणयोर्निवेशनीयत्वात्पर्वतोऽयं धूमवान् वह्निमानित्यादिसमूहालंबनानुमितेरलक्ष्यत्वे
पि क्षत्यभावात्कुतोऽव्याप्तिरत आह लिंगेतिसाधकाभावादित्यादिः न च धूमादिपरामर्शजन्यतावच्छेदकतयैवानुमितेर्वह्निव्या
प्यधूमादिविषयकत्वसिद्धिः अन्यथा विनापि प्रमादिपरामर्शं आलोकादिपरामर्शादुक्तानुमितेरुत्पत्त्या व्यभिचारादिति वा
च्यं तावतापि द्रव्यत्ववत्पर्वतधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रत्येव वह्निव्याप्यद्रव्यत्ववत्तानिश्चयत्वेन हेतुतया तादृशानुमि
तेश्च प्रमात्वनियमेन तत्राव्याप्तितादवस्थ्यात् लाघवविधव्याप्तेरेवानुमितिप्रयोजकत्वस्य व्यवस्थाप्यत्वादिति
भावः ननु पक्षस्य वस्तुगत्या साध्यवत्त्वं तत्र ईश्वरीयव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताज्ञानस्य जन्य
त्वासत्वान्नाव्याप्तिरत आह ईश्वरेति अतिप्रसंगकत्वात् वह्निप्रत्यक्षादिसाधारणत्वात् तथा च तादृशज्ञानत्वा
वच्छिन्नमेव जनकत्वं लक्षणे प्रवेश्यं तच्च प्रकृतानुमितावीश्वरज्ञानस्य नास्तीतिभावः यद्यपि व्याप्तिवि १६
शिष्टत्वसामानाधिकरणपक्षधर्मताया विषयिताविशेषण ज्ञानेन्वयात् तादृशज्ञानमेव लक्षणे प्रविष्टं

अन्यथा परामर्शेण नियमतद्दुष्टत्वदोषतादवस्थ्यात् तत्र च प्रकृतसाध्यीयव्याप्तिप्रवेशे मानाभावात् यत्किंचित्पदार्थीयव्या
प्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया विषयिताविशेषण ज्ञानमादाय लक्षणसंभवात् न कुत्राप्यव्याप्तिसंभावना
तथापि प्रकृतव्याप्तिविशिष्टवैशिष्ट्यनिरूपितविलक्षणविषयितासंबंधेन धर्मत्वस्यैव ज्ञानपदार्थे अन्वयात्सर्वसामंज
स्ये पक्षपदार्थपर्यंतप्रवेशवैयर्थ्यान्नैवमन्वयबोध्य इत्याशयः न च साध्यादिभेदेन व्याप्तेर्भेदादेकोपादाने अन्यसाध्यकानुमि
त्यव्याप्तिरतो जातिगर्भत्वध्रौव्येन कुत्राप्यव्याप्तिरितिवाच्यं तत्सद्धेतुकतत्साध्यकतद्धेतुकानुमितित्वेन वैशिष्ट्ये च लक्षणतया ज्ञा
तिघटनाया नावश्यकत्वात् एकविधव्याप्त्यैव सर्वत्रानुमितौ हेतुत्वादित्याशयादिति अतएव उक्तानुमितिव्याप्तेरेव विशेषविधं
विना कारकविभक्तिमतर्थो येवत्तत्पुरुषस्यव्युत्पत्तेर्नेदाह तज्ज्ञानं वेति व्याप्तिविशिष्टपक्षधर्मताज्ञानात्पुरुषोऽपि नेत्यर्थः
आदिपदात् व्याप्तिविशिष्टाव्याप्तिसमानाधिकरणायपक्षधर्मतेत्यादि कर्मधारयपरिग्रहः मिश्रमतमुपन्यस्यति व्याप्ति
विशिष्टमिति अयं चार्थे द्वंद्व इति पाणिनीयसूत्रेण चार्थे समस्यमानपदार्थयोर्भेदे द्वंद्वस्य विधानादुक्तवाक्यता एव स
ल्लिंगपरामर्शलाभः तत्र व्याप्तिविशिष्टस्यैव पक्षधर्मतया तदुभयोर्भेदविरहाद्दत आह पदार्थयोरिति न्यायसूत्रवदशविध
स्यैव प्रमेयस्य प्रविष्टत्वात्तस्य भेदः प्रमाणे स्थेवेत्स तदुक्तं अन्यत्र चेति अन्यत्र नीलघटयोरभेद इत्यादिवाक्ये तथात्वस्य
त्रापि चार्थे भेदः समस्यमानपदप्रतिपाद्यतावच्छेदकभेदो ग्राह्यः स च प्रकृतेऽपि व्याप्तिविशिष्टत्वे पक्षधर्मतया भेदाद्दस्य

ना· वैतिभावः ननु पदार्थतावच्छेदकभेदेन द्वन्द्वविधाने घटाविलादिसरूपैकशेषो न स्यात् द्वन्द्वापवादकस्य तस्य द्वन्द्वप्रस
क्त्यसंभवात् न च पदबोध्यभेद एव द्वन्द्वः तथा च घटादिसूत्रापि घटाबोध्यानां घटव्यक्तीनां परस्परभेदस्यान्वे द्वन्द्व
७ प्रसक्तिरिति वाच्यं तथा सति घटकलशा वित्येवमपि द्वन्द्वप्रसङ्गात् अनुशासनाभावेन तत्रैकशेषस्य कर्तुमशक्यत्वादिति
चेन्न तत्र सरूपैकशेषासहत्वेऽपि द्वन्द्वस्याभावात् यत्र विष्णुत्वसिंहत्वादिकं विभिन्नमेव हरिपदार्थतावच्छेदकं तत्र तत्संभवाच्चेति
दिक् अत्र नीलघटयोरभेद इत्यादिस्थले विभक्त्युपस्थाप्यद्वित्वादिन विशेष्यान्वितं तस्यैकत्वेन बाधात् नापि विशेषणी
भूतनीलत्वघटत्वादावन्वितं तयोः पदार्थतावच्छेदकत्वेनाकांक्षाविरहात् किंतु अनन्वितमेव न चैवं द्विवचनवैयर्थ्यं द्वारा
दस्तत्र बहुवचनवच्च सुप्यात् इत्यत्रैकवचनपद साधुत्वार्थमेव तदुपयोगादिति ध्येयं स्वामिनो देवदत्तविसत्रवत्युसन्निवेदि
त्यात् पदार्थतावच्छेदकविभक्त्यर्थस्य द्वित्वादेरन्वय इति अत एव [illegible] व्यक्तयः पदार्थ इति न्यायसूत्रे पदार्थ इत्येकवच
नं जात्याकृतिव्यक्तीनामेकशक्तिविषयत्वलाभार्थमिति वार्तिकव्याख्याद्युपवृंदति ननु पदार्थतावच्छेदकयोर्भेदेन द्वन्द्वविधान ७
नीलोत्पलमित्यादि कर्मधारयस्थलेऽपि तदापत्तिरिति आह पदार्थेति भेदस्तादात्म्यातिरिक्तः संबंधः अभेदस्तादात्म्यं त
थाचैकपदार्थधर्मिकपदार्थान्तरवैशिष्ट्यविषयताबहिर्भूतविभिन्नधर्मावच्छिन्नपदार्थद्वयविषयताकबोधजनकत्वेन समे

तेनैकपदानीलोत्पलमित्यस्य द्वन्द्वकर्मधारयोभयत्वेऽपि न क्षतिः पदार्थयोर्भेदे द्वन्द्वविधानेऽपि न क्षतिरित्याशयेनाह विशिष्टपद
स्येति व्याप्तिविशिष्टपक्षधर्मत्वयो द्वन्द्वे विशेषविधिं विना अल्पस्वरस्य पक्षधर्मपदस्य पूर्वनिपातापत्तिरत आह विशिष्टपद
स्यस्यापि क्वचित् ननु व्याप्तिविशिष्टेन पक्षधर्मतायाः द्वन्द्वे वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शेण व्याप्तिविशिष्टस्यावि
षयीकरणात् तत्रानुमितावव्याप्तिरतो वैशिष्ट्यपरतामाह धर्मेति वैशिष्ट्यपरतयेत्यर्थः न च विशिष्टपदस्य तत्परत्वं
लक्षणया तस्य वाच्यत्वेन शक्त्यभावादिति वाच्यं धातोरेव शक्त्या वैशिष्ट्यपरत्वात् भावविहितक्तप्रत्ययस्य निरर्थकत्वा
देतद्वाक्यद्वयितमेव प्रागपि विशिष्टवाक्ये व्याप्तिविशिष्टत्वमिति क्लीबनिर्देशः क्तो नपुंसके भावे क्त इत्येवानुशासनादिति भावः
उक्तत्वादिति तत्र व्याप्तिविशिष्टेत्यादिमूलस्थतच्छब्देनैव धर्मिण्योमूलस्थक्तोक्तत्वादित्यर्थः उक्तत्वाद्विवक्षितत्वादित्यर्थ इ
त्यपि केचित् द्रव्यमिति तत्र व्याप्तिविशिष्टस्य धूमस्यैव द्रव्यत्वेन पक्षधर्मत्वावगाहनादिति भावः मीमांसकेति मीमां
सकैरनुमितित्वेनाभिमते ज्ञाने उक्तलक्षणस्यानुप्रवेशात् कृतत्वादित्यर्थः तथा च वह्निव्याप्यवान् पर्वत इत्यादिपरामर्श
जन्यानुमिताव्याप्तेर्जातिगर्भतया वारणेऽपि वह्निव्याप्यो धूमो धूमवांश्च पर्वत इत्याकारकसमूहालंबनस्यानुव्य
वसायेति व्याप्तिरिति भावः ननु व्याप्तिसंबंधपक्षसंबंधयोः परस्परवैशिष्ट्यानवगाहित्वात् तथा चोक्तसमूहा
लंबनस्यातथात्वात् [illegible] आह मिथ इति अव्यापकत्वात् वह्निव्याप्यधूमवांश्च पर्वत इत्यादिज्ञानएवा

जा. सत्वात् तथा च तादृशपरामर्शोत्तरीयानुमितौ व्याप्तिरिति भावः लक्षणस्थं जन्यपदं जन्यताविशेषविशिष्टपरमिति बह्निव्याप्यधू
मोद्र्वं पर्वत इति दृष्टादिज्ञानजन्ये नातिव्याप्तिरित्याशंका निराचष्टे नचेति तदुभयविषयकत्वनियतेति व्याप्तिसंबंधविषयकत्वा
२८ भावस्य तादृशविषयकान्यत्वस्य वा पक्षधर्मविषयत्वाभावस्य तादृशविषयकान्यत्वस्य वाधिकरणात्ततीयार्थः व्याप्तिवैशिष्ट्य
पक्षधर्मत्वोभयविषयकत्वनियतो यो धर्मः परामर्शत्वं तदवच्छिन्नकारणतानिरूपितकार्यत्वमनुमितावस्तीति तत्र ल
क्षणसत्वं परामर्शाद्यनुव्यवसायेऽपि नु न परामर्शत्वादिना हेतुत्वं किंतु प्रत्यक्षमात्रविषयत्वेन तज्जनतदुभयविषयकत्वनियतोऽघट
ज्ञानादौ व्यभिचारात् तत्र परामर्शप्रत्यक्षे विषयविधया घटादि इष्टौ चोद्बोधक विधया तत्र परामर्शव्यक्तेर्न हेतुतास
त्वेतु धर्मपदं नानाव्यक्तिवृत्तिधर्मार्थकं वा च्यमिति भावः वैयर्थ्यादिति स्वव्यापकतदुभयविषयकत्वसामानाधिकरण्या
त्मके तदुभयविषयत्वनियमे स्वव्यापकव्याप्तिविषयकत्वसमानाधिकरणधर्मावच्छिन्नेत्यस्यैव सम्यक्त्वादिति प्राचः तदु
भयविषयकत्वाभाववदवृत्तित्वलक्षणनियमस्य निवेशे खंडाभावघटकतया पक्षधर्मताविषयकत्वस्य वैयर्थ्यावि
रहेण न तत्प्रयोजनकत्वादिसर्थ इति कश्चित् नच व्याप्तिविशिष्टबुद्धौ व्याप्तिज्ञानत्वेन हेतुत्वाभावात्रातिव्याप्तिवारणा
र्थमेव पक्षधर्मताप्रवेशः तन्निवेशेऽपि व्याप्तिविशिष्टवैशिष्ट्यबुद्धावतिव्याप्तिरतस्तद्वारणार्थं चरमज्ञानस्य व्या २८
प्यविषयकत्वेनावश्यं विशेषणीयत्वे तत एव व्याप्तिविशिष्टबुद्धावतिव्याप्तेर्निरासात् नचैवं व्याप्यविषयकत्वे

सति व्याप्तिज्ञानजन्यत्वमित्यस्यैव सम्यक्त्वे व्याप्तिविषयकत्वनियतधर्मावच्छिन्नकारणत्वप्रवेशोऽपि व्यर्थ इति वाच्यं परमेश्व
रीयव्याप्तिज्ञानजन्यस्य वह्न्यादिप्रत्यक्षवारकतयैव तस्य सार्थकत्वात् यद्यपि पक्षधर्मताविषयकत्वनियतधर्मावच्छिन्न
कारणतेत्यादेरेव सम्यक्त्वात् व्याप्तिपदोपादानं वैयर्थ्यमिति दीधितिकृद्युच्यते नचैवं धूमवत्पर्वतविशिष्टबुद्धावतिव्याप्तिश्चर
मज्ञानस्य पक्षधर्मताविषयत्वेन विशेषणीयत्वे वासंभवः अनुमितिमात्रस्यैव साध्यांशे पक्षविषयकत्वादिसंबंधत्वादिति वाच्यं सा
ध्यादिभेदेन व्याप्तिविपक्षादिभेदेन पक्षधर्मताया अपि भिन्नतया धूमवत्पर्वतविषयकत्वे नियतधर्मावच्छिन्नकारणताकत्वे स
ति धूमवत्पर्वताविषयकज्ञानत्वमित्युक्तत्वसंभवविरहात् तथाप्यभावाविषयत्वपर्यवसन्नस्य व्याप्यविषयकत्वस्य चरमज्ञा
नविशेषणत्वे लाघवं पक्षधर्मताविषयकत्वप्रवेशे तु गौरवमेव धूमाविषयकत्वेनोक्तौ गौरवविरहेऽपि धूमवान् पर्वतो वह्नि
मानित्याकारके नानुमितिर्लिंगोपधानमतस्य प्रामाणिकत्वे सर्वत्रैवोक्तप्रकारो न संभवतीत्याशयेन पक्षधर्मतापदस्य
वैयर्थ्यमुक्तं संशयत्वस्य कार्यतावच्छेदकत्वे साधारणधर्मदर्शनविधया हेतुमत्तानिश्चयजन्ये साध्यादिसंशये तिव्याप्तिमि
या व्याप्तिविशिष्टपदवैयर्थ्यं नोक्तमित्यपि कश्चित् केचित्तु यत्र साध्यस्यैव हेतुत्वमनुमितवानुमितिः तादृशस्थलीयपक्षधर्मताम
र्शाव्योक्तक्रमेण लक्षणकारणस्यासंभवात् व्याप्तिपदवैयर्थ्यं नोक्तमित्यप्याहुः इति तु स्यादिति यद्यपि धूमो वह्निव्याप्यो
धूमवान् पर्वत इति इत्यादिज्ञानस्यापि निरुक्तरूपवत्त्वात् तदनुव्यवसायेतिव्याप्तिः पक्षधर्मांशे व्याप्तिप्रकारकत्वविवक्षणे तु मिश्रो
क्तहेतूपेक्षणमनुचितं तत्राप्युक्तविवक्षासंभवात् तथापि व्याप्तिप्रकारकमित्यस्य व्याप्यप्रकारो यस्य तादृशस्य व्याप्यस्य

न्या. वच्छिन्नप्रकारताकमित्यर्थः तथा च रूपान्तरकर्मधारयेणान्वयितावच्छेदकावच्छेदेन विधेयतावच्छेदकावच्छिन्नान्वयस्य व्युत्पत्तिसिद्धतया प
क्षधर्मतावगाहितावच्छेदेन व्याप्यवच्छिन्नप्रकारकत्वस्य शब्दादेव लाभान्नाविवक्षादूदहेतुस्वातंत्र्ये पौनरुक्त्यमेव स्यादीयमिति पूर्वेणान्वये
१२ लक्षणीयमिति भावः अत्रापीसपिकारेण प्रागुक्तसकलसमासः समुच्चीयते वह्निव्याप्यो धूमवानित्युक्तौ तु साध्यवदन्याव
त्तिरूपव्याप्तिमादाय कदाचित्प्रसिद्धिं कुर्यादतो विशिष्य निर्दिशति इदं धूमसमानाधिकरणेति अखण्डव्याप्तेरिति यद्यपि तमोऽ
व्यरूपत्वादिसाध्ये तमःसमवेतत्वरूपपक्षधर्मत्वस्याप्रसिद्धिरस्ति तथापि पक्षधर्मताज्ञानमिति ज्ञानान्तरत्वस्वरूपेण पक्षांशे
धर्मतावगाहिज्ञानलाभादेव न तद्दोष इत्याशयः ननु साध्यहेतुव्यापकतावगाहित्वानिरूपितयतो साध्यसामानाधिकर
ण्यावगाहित्वं तदेवं व्याप्तिप्रकारकत्वं वाच्यमतो नोक्तव्याप्तिरसत आह भ्रमानुमितेरिति एतन्नियामकसंबंधेन साध्यहेतु
भावोऽखण्डव्याप्तेः प्रसिध्या तत्र सानुमितावव्याप्त्यसंभवात् एतन्नियामकसंबंधेन साध्यत्वसाध + संयोगादि × नत्वयोः
सूचनार्थमत्रेत्युक्तं सुतरामिति अव्याप्तिरिति पूर्वेणान्वयः अत्र हेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरप्रसि
ध्यात् द्वयावगाहित्वमंतर्भाव्यापिलक्षणांक धूमशक्यमित्यव्याप्तिरेवेति भावः तावदिति प्रागुक्तक्रमेणान्वयव्या १२
प्तिघटकेत्यादिस्तथाविधमनुमित्युपयोगियत्परस्परसंबंधावगाहित्वं विशिष्टवैशिष्ट्यविषयताविशेषरूपं तदेकवि
वक्षितं व्याप्तिप्रकारकपदेनेत्यर्थः तेन धूमाधिकरणमधिकरणवृत्तिरभावद्वसाकारकस्यतावसदर्थगोचरस्य
समूहालंबनस्य व्युदासः यद्यप्यन्योन्याभावगर्भान्वयव्याप्तिज्ञानरूपकलीयानुमितावव्याप्तिः संभवति असत्ता

भावगर्भान्वयव्याप्तिनिविष्टं वस्तुतामेवतावसहायेत्यादिना परामृष्टत्वात् तथाप्यन्वयव्याप्तानां मध्ये सत्ताभावगर्भायाः सि
द्धांतोक्तव्याप्तेरेवानुमित्युपयोगित्वमनुसृत्य संशंकतेन चेति व्यतिरेकिणीति व्यतिरेकव्याप्तिज्ञानजन्यानुमितावित्यर्थः अ
त्र परामर्शस्य पक्षे साध्याभावव्यापकीभूताभावप्रतियोगित्वेन हेतुत्वावगाहितया अन्वयव्याप्तिप्रकारकत्वाभावादिति
भावः केचित्तु निरुक्तावगाहित्वाभावशून्यपरामर्शजन्यानुमितावित्यर्थः तथा चान्योन्याभावगर्भव्याप्त्यवगाहिपरामर्शस्या
पिसंग्रहान्न दोषः अग्रे विरोधप्रदर्शने ऽसत्ताभावप्रदर्शनमुपलक्षणमिति वदंति व्याप्तिद्वये व्यभिचारधीविरोधित्वं या
द्दृशाति भवति तदाह इति धूमत्वहेतिगृहीतद्वयस्यान्वितं ननु धूमव्यापकवह्निसमानाधिकरणधूमसमानाधिकरणो रास
भवान् पर्वत इति ज्ञानसत्वेपि धूमे व्यभिचारज्ञानानुदयात्तस्यापि व्यभिचारधीविरोधित्वमतस्तज्जन्यानुव्यवसा
येति व्याप्तिरत आह तथाविधेति वह्निव्याप्येत्यर्थः न तथा न पक्षधर्मांशे व्यभिचारधीविरोधि तथा तदवच्छिन्न
विशेष्यकव्यभिचारधीविरोधिधीविषयप्रकारकतदवच्छिन्नत्वनाधीजन्यत्वमित्यर्थः प्रागुक्तबुद्धिस्तु न रासभत्वावच्छिन्नविशेष्यकव्यभि
चारज्ञानस्य विरोधिनी धूमत्वावच्छिन्नविशेष्यकव्यभिचारधीविरोधित्वेपि न तस्य पक्षधर्मतया नयतेन दोष इति भावः नव्यास्तु धूम
व्यापकवह्निसमानाधिकरणत्वमात्रमन्वयव्याप्तिः तस्याश्च न व्यभिचारधीविरोधित्वं धूमव्यापकवह्निसमानाधिकरणो रासभ
इति ग्रहेपि रासभो वह्निव्यभिचारीति प्रत्ययात् किं व्यभिचारिधीविरोधिधीविषयत्वेन तदनुगम इत्यत उक्तं तथाविधेति तथाविधं
धूमव्यापकवह्निनिरूपितधूमनिष्ठसामानाधिकरण्यं व्याप्तिः न तथा न व्याप्तिः रासभादौ पक्षवृत्तिरासभादौ व्यभिचारग्रहात्

जा. अनुमित्यात्मककार्यस्यान्वयव्यभिचारग्रहात् तथा चैतदर्थमेव धूमव्यापकवह्निसमानाधिकरणधूमत्वपर्यन्तं प्रागुक्तमिति भावः इति
प्राहुः ननु साध्यसामानाधिकरण्यस्यापि व्यभिचारधीविरोधिधीविषयतया तत्प्रकारकस्य वह्निसमानाधिकरणधूमवान् पर्वत इत्या
२० दिज्ञानजन्ये तदनुव्यवसायादौ अतिव्याप्तिः यादृशविशिष्टविषयकत्वेन व्यभिचारज्ञानं प्रति विरोधित्वं तत्प्रकारकत्वोक्तौ चान्वयव्याप्त्यसं
ग्रहः केवलधूमव्यापको वह्निरिति ग्रहेऽपि धूमो वह्निव्यभिचारीति ज्ञानानुदयेन धूमत्वविशिष्टे वह्निव्यभिचारग्रहप्रतिबन्धको धूम
व्यापकतानिश्चयत्वेनैव प्रतिबन्धकत्वध्रौव्ये व्याप्तिनिश्चयत्वेन पृथक्प्रतिबन्धकत्वाकल्पनात् वस्तुतः समानाधिकरणज्ञानस्यैव प्र
तिबन्धकतया द्वयोरपि बुध्योर्व्यभिचारधीप्रतिबन्धकत्वाभावात् अनुगमासम्भवः न च व्यभिचारधीपदेनान्वयव्याप्तिव्यतिरेकव्या
प्त्योरभावविषयकं ज्ञानविशेषमुपादाय तद्बुद्धिप्रतिबन्धकतावच्छेदकप्रकारितात्वेनान्वयव्यतिरेकव्याप्तिप्रकारताद्वयमनुगमय्य
तादृशप्रकारितावच्छिन्नपक्षधर्मताज्ञानजन्यत्वमर्थ इति वाच्यं धूमो वह्निव्याप्यो नेति बुद्धावधिकरणे न धूमीयमित्यादिज्ञानस्या
विरोधितया निर्धूमधूमवान् पर्वत इत्यादिज्ञानस्यापि निरुक्तरूपवत्तया तज्जन्यानुव्यवसायादावतिव्याप्तिः प्रतिबन्धकतावच्छेद
कादिभेदेन प्रतिबन्धत्वादिभेदादेवमपि अनुगमस्य कर्तुमशक्यत्वाच्चेति अस्वरसादाह व्यतिरेकेति तथा च व्यतिरेकव्याप्तिज्ञानहे
तुकत्वेन कृतः तज्जन्यानुमितावव्याप्तिरिति भावः स्वयं व्यतिरेकपरामर्शजन्यबुद्धेरर्थापत्तित्वोपगमात् आश्रयाणामित्युक्ते आ २०
चार्यैराश्रयाणामिति दृष्टिः नरत्वाणुरत्वाणुर्न वा इत्यादिभ्रमसंशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमानयमित्यादिविशेषदर्शन
जन्ये ऽयं स्थाणुरित्यादिप्रत्यक्षे अतिव्याप्तिः व्याप्तिविशिष्टपक्षधर्मत्वज्ञानजन्यत्वस्यापि तत्र सत्त्वादित्याशङ्केते न चेति भ्रमसंशयेति विशे
षणज्ञानत्वेनोपनयविधया च विशेषदर्शनस्य संशयोत्तरप्रत्यक्षे हेतुत्वात् हेतुतामत इत्यसङ्गतं तथापि प्रत्यक्षादिज्ञानस्यापि कालो

पाधिविषयपरामर्शजन्यत्वात् तद्वारणार्थमेवावश्यं किंचिद्विशेष्यकत्वावच्छिन्नं पक्षीभूतपर्वतादिविशेष्यकत्वावच्छिन्नं वा परामर्शज
न्यत्वमेव लक्षणे निवेश्यं तथा च तत्प्रकारकबुद्धित्वावच्छिन्नं प्रत्येव तद्विशेषणज्ञानत्वादिना हेतुत्वात् तद्विशेषणज्ञानादिजन्यता
याः किंचिद्विशेष्यकत्वानवच्छिन्नत्वेन तामादाय न दोषः किंतु संशयोत्तरप्रत्यक्षत्वाद्यवच्छिन्नजन्यतामादायैव तादृशजन्यताया
वच्छेदकत्वस्यावश्यकत्वादिति भावः यत्तु कालोपाधिविषयपरामर्शजन्यत्वमादाय प्रत्यक्षादावतिव्याप्तिनिराकर्तुं प्रमितित्वावच्छि
न्नकोपाध्यवच्छिन्नमेव परामर्शजन्यत्वं लक्षणे निवेश्य तादृशं च न विशेषणज्ञानजन्यत्वं विशिष्टबुद्धित्वेनैव तद्धेतुत्वेन अतो हेतुतामत
इत्युक्तं न च तथापि तत्तल्लौकिकप्रत्यक्षे तत्प्रकारकप्रत्यक्षं प्रत्येव वा तद्विषयकज्ञानत्वेन हेतुताद्वयात्तादृशोपनयजन्यतामादाय स्वमतेऽपि संशयो
त्तरप्रत्यक्षेऽतिव्याप्त्या हेतुतामत इत्यसङ्गमेवेति वाच्यं तादृशहेतुतायां मानाभावात् अप्रसिद्धसाध्यकानुमितिसाध्यविशेषण
कत्ववारणाय तत्प्रकारकानुभवत्वावच्छिन्नं प्रत्येव तद्विषयकज्ञानत्वेन हेतुत्वावश्यकत्वेन तत एवोपनीतप्रत्यक्षसम्भवात् न च स्वमतेऽपि अ
लौकिकघटादिविशेष्यकमानसानुरोधेन तल्लौकिकप्रत्यक्षं प्रति तज्ज्ञानत्वेन कारणत्वमावश्यकमिति वाच्यं तदनुरोधेना
लौकिकमानसत्वकार्यतावच्छेदकतायाः स्वीकारादिति मतं तच्चिन्त्यं एतावतापि भावस्य स्थाणुत्वादेरलौकिकप्रत्यक्षत्वावच्छिन्नं
प्रति तज्ज्ञानत्वेन हेतुतायां बाधकाभावात् तदुपनीतभान- के संशयोत्तरप्रत्यक्षस्य स्वमतेऽप्यतिव्याप्तिसम्भवात् अभावस्साध्य
कानुमितेरेव न सिद्धसाध्यकत्वेनाभावप्रकारकानुभवत्वावच्छिन्नं प्रत्येव तद्वोऽचरज्ञानत्वेन हेतुत्वस्य क्लृप्तत्वात् अप्रसिद्धसाध्यकपराम
र्शस्य साध्यविशेष्यकानुमितिं प्रत्येव हेतुत्वात् ततः साध्यविशेषणकानुमितेरसम्भवाच्चेति ध्येयं अत्र भ्रमसंशयोत्तरप्रत्यक्षविशेष
दर्शनस्य हेतुत्वमानाभावः विशिष्टबुद्धिसामान्यसामग्र्यात एव संशयोत्तरप्रत्यक्षस्यापि सम्भवादेककोटिविशिष्टदर्शनस्या
परकोटिकविषयधीप्रतिबन्धकतयापेक्षणात् न च वन्तदीयसंशयोत्तरप्रत्यक्षं प्रति तदीयविशेषदर्शनस्याहेतुत्वे संशयोत्तर
शि

जा· विशेषदर्शनोत्पत्तिदशायामपि न तद्वत्तानिश्चयात्मकप्रत्यक्षोत्पत्तिः स्यादिति वाच्यं दृष्टत्वात् क्षणविलंबस्य शपथनिर्णेतव्यत्वात् न
च वह्निव्याप्यधूमवत्तानिश्चयोत्तरं पर्वतधर्मिकवह्निविधेयकत्वावच्छिन्नं प्रत्येव वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुत्वमुच्यतां ला
२१ घवान्न तु तादृशानुमितित्वावच्छिन्नं प्रति हेतुत्वं गौरवात् स्वीक्रियतां च तादृशविधेयताकत्वं अनुमितावेव भ्रमसंशयोत्तरनिश्चयात्मक
प्रत्यक्षेपीति तत एव विशेषदर्शनोत्पत्तिकाले संशयोत्तरं प्रत्यक्षवारणं संभवतीति वाच्यं अनुमितावेव पक्षनिष्ठविशेष्यतानिरूपितसा
ध्यप्रकारतानतिरिक्तस्य विधेयत्वस्य सर्वानुभवसिद्धतया निरस्यतया प्रत्यक्षे तस्य स्पर्शकानास्पदत्वादिति भावः किंच भ्रमसंशयात्म
धर्मिकतद्व्याप्यदर्शनस्य हेतुत्वं वाच्यं अन्यथा व्यभिचारापत्तेरित्युक्तं अव्यवहितत्वस्य स्वत्वादिगर्भत्वेनाननुगतत्वात् विशिष्टबुद्धित्वसा
मान्यं प्रत्येव विपरीतनिर्णयस्य प्रतिबंधकतया बाधभ्रमसत्त्वे तद्वत्ताप्रत्यक्षस्य विशेषदर्शनसहस्रेणाप्यसंभवात् निश्चयत्वस्यार्थसमाजग्रस्तत्वे
न कार्यतावच्छेदकत्वासंभवाच्च न च तद्धर्मिकतद्वत्तावधारणात्मकप्रत्यक्षं प्रत्येव तद्धर्मिकतद्व्याप्यदर्शनस्य हेतुत्वं नियमविषयक तस्यावधारणा
त्मकस्य सर्वत्र संशयोत्तरप्रत्यक्षे असंभवात् तस्याप्यर्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वाच्च विशेषस्यावधारणात्वस्य च मानाभावेन निरस्तत्वा
दित्याशयेन हेतुतामतद्युक्त्वा स्वरसोऽयं तिलस्तथाविधनिश्चयत्वेनेति पक्षधर्मिकव्याप्यवत्तानिश्चयमात्रेणेत्यर्थः न च तत्तदप्रामाण्यज्ञा
नानास्कंदितत्वस्यापि कारणतावच्छेदकनिवेशनमात्राभिधानमप्युक्तं परामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावस्य स्वातंत्र्येणैवानुमितिहेतुत्वा
त् अन्यथा विशेष्यविशेषणभावमहाविनिगमनाविरहेण गुरुतरानंतकार्यकारणभावप्रसंगात् [illegible] प्रामाण्यप्रत्यक्षोपेक्षयैकस्य परामर्शेन २१
त् अन्यपरामर्शात् क्षणविलंबेनैवानुमितेः स्वीकारात्तदुत्तरपरामर्शादावेव विशिष्य तत्तदप्रामाण्यज्ञानत्वावच्छिन्नाभावत्वेनैव वा हेतुत्वस्य वक्त
व्यत्वादिति भावः केचित्तु भ्रमेत्यादि तथाविधनिश्चयत्वेनेत्यंत एव ग्रंथः तेन विशेषदर्शनस्य विशेषणज्ञानविधया हेतुत्वं [illegible] तत्रापि हे
तुतामतः इत्यस्य नासंगतिरित्याहुः ननु निश्चयत्वेन हेतुत्वविवक्षणेप्यतिव्याप्तितादवस्थ्यं तद्विशेषदर्शनस्यापि तद्व्याप्यवत्तानिश्चयत्वाद

त आह विशेषदर्शनस्य चेति तथा च विशेषदर्शनस्य भ्रमादिविरोधित्वेन कारणत्वं अनुमितौ तु व्याप्यवत्तानिश्चयत्वेनेति विलक्षण्य
इति भावः भ्रमादीति अन्यथा तमसि घटसंशयोत्तरं विनापि व्याप्यदर्शनं आलोकसंयोगमात्रात् घटनिर्णयो न स्यादिति भावः त
त्वं हेतुत्वं व्यावर्तकधर्मदर्शनव्यंजकसंयोगादिसाधारणं भ्रमादिविरोधित्वमप्येकं द्वेधा चमित्यावेदयितुं मुक्तत्वादिति वस्तुतः तद्रूपवि
चनमात्रं न तु दोषस्थलीयतत्त्वाभावव्याप्यदर्शनव्यावृत्तं संभवतीति भावः यद्यपि वह्निव्याप्यवत्तानिश्चयत्वघटकदलद्वयस्य विशेष
णविशेष्यभावेन गुरुतरकार्यकारणभावद्वयकल्पनामपेक्ष्य प्रत्यक्षे तत्साध्यज्ञानानुमितिप्राप्तितद्विशेषकतद्व्याप्याभावप्रकारकज्ञान
त्वेन प्रतिबंधकताया एव लाघवेन कल्पनात् व्याप्यसंशयतोऽनुमित्यनुत्पत्तिसंभवात् व्याप्यवत्तानिश्चयत्वेन नानुमितौ हेतुत्वं किंतु
व्याप्यप्रकारकज्ञानत्वमात्रेण तत्र च भ्रमत्वज्ञानानास्कंदितत्वमेवापेक्षितं निश्चयानास्कंदितत्वं संशयसाधारण्यव्याप्यवत्ताज्ञा
नस्य कुत्रचिदप्यनुमित्यनुपधायकत्वात् व्याप्याभावप्रकारकत्वेन प्रतिबंधकतायामपि न भ्रमत्वनिश्चयानास्कंदितत्वस्य भ्रमत्वज्ञा
नास्कंदितत्वस्य वा निवेशो भ्रमत्वनिश्चयास्कंदितादृशव्याप्याभावसंशयादप्यनुमित्यापत्तेः यत्र च व्याप्याभावस्य भ्रमोत्तरं
शत्याद् अनंतरा व्याप्यपरामर्शः तत्र भ्रमादेर्नाशोत्तरमेवानुमितिः गुरुतरव्याप्यनिश्चयत्वेन हेतुत्वमपेक्ष्य क्षणविलंबकल्पना
या न्याय्यत्वात् तथापि व्याप्यतदभावसमुच्चयात्मकपरामर्शादनुमित्युत्पत्ते व्याप्याभावप्रकारकत्वानवच्छिन्नव्याप्यप्रकारकत्वा
वच्छिन्नं यन्निष्ठविशेष्यताकज्ञानत्वरूपपक्षधर्मिकव्याप्यवत्तानिश्चयत्वं गुरुतरमपि हेतुतावच्छेदकीभूतमिति प्राञ्चः नव्यास्तु व्याप्यप्रका
रत्वान्यप्रकारत्वानवच्छिन्नपक्षनिष्ठविशेष्यताकज्ञानत्वमिव पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं वाच्यं अतस्तादृश्यैवानुमितिहेतुता
या न विनिगमनाविरहावकाशः पक्षः साध्यव्याप्यवान्नवेति आदिसंशयस्य व्याप्यप्रकारतानिरूपितं पक्षनिष्ठविशेष्यत्वं तद्व
व्याप्यप्रकारताभिन्नेन व्याप्याभावप्रकारत्वेनावच्छिन्नं मतस्तादृशसंशयादनुसारः संशयमात्रस्यैव प्रकारताद्वयनिरूपितके

ज्ञा. विशेष्यत्वादत एव लीलावतीप्रकाशेपि विरोधेनानारूपावच्छिन्न[illegible]विषयताशालिज्ञानं संशयः समूहालंबने [illegible] विरोधि
कप्रकारतावच्छिन्नविभिन्नैव विशिष्यं ननु विरोधि[illegible]नारूप निरूपितेत्यादि संशयग्रंथे स्फुटमभिहितमिति प्राहुः अत एवे
ति तादृशनिश्चयत्वेन हेतुत्वस्य लक्षणाघटकत्वादित्यर्थः [illegible] लिंगव्याप्यं तथा च व्याप्यवत्त्व [illegible] रूपेत्यादि[illegible]
२२ ज्ञानं वह्निव्याप्यधूमवत्पर्वतस्तदृशमहानसपदवाच्यमित्याकारकं तज्जन्यायामिदं महानसपदवाच्यमित्याकारकोपमितावति
र्थः तथाविधेति तादृशोच्यातिदेशवाक्यार्थः [illegible] तत्तदनुसंधानत्वमित्यर्थः ननु वाक्यार्थस्यापि प्रवेशे गौरवात्तमानाभावात्[illegible]
न चेति वाच्यमिति परेणान्वयः न्यायाभिव्यक्ति चिंतामणि[illegible] पंचावयवजन्यविशिष्टवैशिष्ट्यबुद्धिस्वीकारात् [illegible]
विशेष्यक निगमनार्थप्रकारकबोधे अतिप्रसंगो द्रष्टव्यः नु वह्निव्याप्यधूमवान् यत्किंचित् सुपनयार्थज्ञानं न पक्षे व्याप्तिविशिष्ट
प्रकारकमतु वर्षस्य वह्निव्याप्यधूमसंबंधिः एवं तादात्म्येन [illegible]प्रकारत्वात् लक्षणाघटकत्वं च तादृशमेवज्ञानं वतो नातिव्याप्तिः
तथा चायमित्यादि प्रयोगस्तु न सर्वसंमत इत्यत आह तत्र[illegible] ति ननु यत्रासौ स्तीत्यादि वाक्यात् वह्निव्याप्यधूमवान् पर्वतोस्ती
त्यादि धीस्तत्रैव कारणारुकैव्या[illegible]दि घटको[illegible]त प्रयोग[illegible] शक्तिज्ञानात् प्रत्येकपदार्थोपस्थितिः परस्पर
न्वयबोधो नेत्याह एवं तत्पदव्याप्यवत्पर्वतस्योपस्थितिरतो नातिव्याप्ति[illegible] तदाप्याह संकेतितेति यत्र वह्निव्या
प्य धूमवत्पर्वत एव डित्थादिपदस्य संकेतग्रहः प्रथमं जातः तत्र डित्थोस्तीति वा[illegible] व्याप्यधूमवत्पर्वतोस्ती त्याकारक[illegible] २२
बोधेति व्याप्तिरित्यर्थः शाब्दात्तत्रानिरुक्त व्युत्पत्तेरे[illegible]दिति भावः ननु [illegible]ज्ञानं न न्यायार्थज्ञानहेतुः तद[illegible]
त्येकपदजन्यपदार्थस्मृतेर्महावाक्यार्थधी पर्यंत [illegible] वाक्यार्थे[illegible] महावाक्यार्थबोधावहेतुत्वात्[illegible]
तत्रातिव्याप्तिरत आह व्युत्पादयिष्यत इति पदजन्यपदार्थस्मृतिः तत्र न[illegible]बोध[illegible] पदप्रयोज्य पदार्थता

[illegible] वाक्यार्थबोधमात्रे येत्यर्थः [illegible] ननु तत्[illegible] सेनैव पद[illegible]पस्थितिरव[illegible]
[illegible] वाक्यजन्यबोधे कथमतिव्याप्तिरित्यत [illegible] पूर्वेणान्वयः व्याप्यवत्[illegible]
[illegible]रत्वस्मरणेपि [illegible] निश्चयत्वेन [illegible] व्याप्तिवारणाय तथाविधनिश्चय
त्वमात्रावच्छिन्नमेव हेतुत्वं लक्षणे प्रवेश्यमित्याशयः [illegible] कस्कोति पदजन्यत्वस्येति कारणत्वादित्यर्थ येन च
टादिपदादुपस्थित[illegible]शाब्दबोध[illegible] पदजन्यपदार्थोपस्थितित्वेन तत्र शाब्दबोधं प्रति
हेतुत्वादित्यर्थः ननु चरम[illegible] पदस्यानुभवपर[illegible]णासंभवात् तथाविधनिश्चयत्वमात्रेण हेतुत्वलक्षणेन निवे
[illegible] किंतु तादृशनिश्चयत्वेन हेतुत्वनिवाच्य[illegible] धूमत्वज्ञानस्कंदितव्याप्यवत्ता निश्चयत्वेनैव हेतुत्वात्[illegible]
[illegible]तः शाब्दधीवारणमत आह निश्चयत्वे[illegible] शाब्दबोधेन तदर्थकपदज्ञानत्वेन हेतुत्वे तत्र च [illegible]
[illegible]पदार्थोपस्थितेः कारणता घटक[illegible] निरासि संभवे पदार्थोपस्थिति हेतुतादा[illegible]
[illegible] अत आह [illegible] स्मृतिशाब्दरूपायां पदार्थोपस्थितौ
[illegible] निश्चयत्वनियतत्वात् शाब्द[illegible] ज्ञानजन्यपदार्थोपस्थितित्वेन व्याप्य[illegible]
[illegible] न चेति वाच्यमि[illegible] पदार्थोपस्थिति[illegible]न्यतया[illegible]

जो. शसेपि अत्र च घटवदित्यादि विशिष्टवैशिष्ट्यबुद्धौ न घटत्वादिनिश्चयत्वेन हेतुत्वं किंतु घटत्वादिप्रकारकज्ञानत्वमात्रेणायं घटो
न वेति संशयोत्तरमपि तादृशबुद्ध्युत्पादात् किंतु यत्र विशेषणतावच्छेदकांशे धर्मितावच्छेदकतया किंचिद्भासते तत्रैव तत्
२२ प्रकारकनिश्चयत्वेन हेतुत्वं यथा नीलघटवदित्यादौ घटत्वावच्छिन्नविशेष्यक नीलनिश्चयत्वेन हेतुत्वमित्यावेदयितुं
तन्नादिसमिदितमिति ध्येयं वस्तुतः पर्वतो वह्निव्याप्यधूमवान्नवेति संशयदशायां वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्न
प्रकारकस्यैव तादृशविशिष्टपर्वतत्वावच्छिन्नविशेष्यताकस्यापि ज्ञानस्यानुत्पादात् उभयत्रैव पर्वतविशेष्यक वह्निव्याप्यधूमवत्तानि
श्चयत्वेन हेतुत्वं अन्यतात्तु वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयकेतो ज्ञानत्वेनैव बोध्या विशेष्यताप्रकारत्वयोर्द्वयोरपि तादृशविष
यतात्वात् एवं च विशिष्टस्य वैशिष्ट्यमिति बुद्धौ एकविशिष्टे परवैशिष्ट्यमिति बुद्धौ चोभयत्रापि विशेषणतावच्छेदकप्रकारनिर्णयत्वेन हेतुत्वं
मित्यावेदयितुं तन्नादिसमिदितमिति ध्येयं विशेष्ये विशेषणं तत्रापि विशेषणान्तरमित्यादिज्ञानस्यापि विशिष्टवैशिष्ट्यज्ञानतया तत्र
विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वासंभवान्न तादृशमुक्तमित्यपि केचित् स्वलेकपोतन्यायेनैव शाब्दधीरिति मते तादृशप्रत्यक्ष
स्यैव विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वं शाब्दादिस्तादृशविषयतायाः पदार्थोपस्थित्यादेरेव नियामकत्वसंभवात् इतिमते—
न शाब्देतिव्याप्तिरतः असद्देवमुक्तं ननु विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुत्वं न तु निश्चयत्वेन गौरवा २३
न्न सुतो व्याप्तिरत आह दंडी रक्तो न वेति तादृशसंशयानुव्यवसायस्तु रक्तत्वेन दंडे संदेहि इत्याकारकोऽरक्तत्वतदभावप्रकारकदंडवि
शेष्यकज्ञानवत्ताविषयीहानुकरक्तविशिष्टदंडज्ञानावगाही रक्तदंडसंदेहीत्यनुव्यवसायस्तु रक्तपदस्य तदीयत्वे वा विशेष्यविशे

षणमिति न्यायेनैव नचैवं दंडी रक्तो न वेति संशयानंतरमपि रक्तदंडवानहमिति बोधो चेत्सावर्जितः संशयाद्योनस्यादितिवाच्यं सत्येव
तस्यापि विशेष्ये विशेषणमिति न्यायेनैव स्वीकारात् केचित्तु विशिष्टवैशिष्ट्यविषयताकस्यापि संशयस्यानुभवसिद्धतया वि
शेषणतावच्छेदकप्रकारकज्ञानत्वेनैव तादृशबोधहेतुत्वं ननु तादृशनिश्चयत्वेन गौरवात् व्यभिचाराच्च न च संशयनिश्चयसाधारण
ज्ञानस्याप्रामाण्यनिश्चयानास्कंदितस्यैव कार्यजनकतया तदप्रामाण्यनिश्चयत्वावच्छिन्नाभावत्वेन हेतुत्वकल्पनेन गौरवमिति वाच्यं
सर्वस्यैवाप्रामाण्यज्ञानस्यानुगतरूपेण तद्विरोधित्वस्य दुर्वचत्वेनाप्रामाण्यनिश्चयानां तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेन हेतु
तायां गौरवानवकाशात् विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वपक्ष एव तदप्रामाण्यज्ञानमात्रस्य कार्यविरोधित
या तदप्रामाण्यनिश्चयव्यक्तीनामिव तदप्रामाण्यसंशयव्यक्तीनामप्यभावकूटस्य तत्तद्व्यक्तित्वेनैव विशिष्टवैशिष्ट्यधी
हेतुत्वकल्पनायां विपरीतगौरवापत्तेरित्याहुः विशिष्टे तु घटत्वादिविशिष्टे यो विषय स्तद्भिन्नकत्वं इत्यर्थः तथा च वीजस्य
तदवस्थज्ञानेन जनितया … घटमिदं … घटं … भीत्यादि विशिष्टवैशिष्ट्यप्रसिद्धौ व्यभिचारान्न ज्ञानत्व तदीयकार
णतावच्छेदकमविशिष्टमिति भावः तेनाविनश्यदवस्थज्ञानजनितच्छादशिखावांगो निर्विकल्पकप्रसंगस्य तज्जनकज्ञानां
दिच्छावादिप्रकारेण तादृशेच्छादद्वितीयसाक्षात्कारस्य प्रागुपनीतस्य घटादिविषयकेच्छावादिनिर्विकल्पकादेव सं
भवात्तादृशजनकेच्छे व्यभिचारासंभवेपि न क्षतिः ननु ज्ञानस्येच्छाद्वेषौ प्रतिकार्यसहभावेनैव हेतुत्वमते विनश्यदवस्थ

तो न च परामर्शानुव्यवसायेतिव्याप्तिरिति तथाविधनिश्चयत्वेन हेतुत्वस्य विवक्षितत्वादित्यादि प्राक्तनहेतुरनुपपं ज्ञनीयः सामान्यवा
जा· तोनचपरामर्शानुव्यवसायेतिव्याप्तिरिति विषयत्वेनेति साक्षात्करोमीतिप्रतीतिसाक्षिकविलक्षणविषय
तीयनवग्रेपाठः तेननचेत्सत्रहेतुत्वला भेनक्षतिरितिध्येयं विषयत्वेनेति साक्षात्करोमीतिप्रतीतिसाक्षिकविलक्षणविषय
·५ त्वेनेत्यर्थः तेनअतीन्द्रियस्य गुरुत्वादेः सत्यपीन्द्रियसंनिकर्षे स्यप्रत्यक्ष नतुनिर्विकल्पकविषयत्वेनेत्यर्थः ज्ञानादेः सविषयक
मात्रवेद्यत्वात् तत्प्रत्यक्षेव्यभिचारापत्तेः अत्रचकारणस्यसादात्म्यं कार्यस्यतु लौकिकविषयत्वं प्रत्यासत्तिः तेनातीतविषयक
प्रत्यासत्तीतविषयाणां मन्हेतुत्वेपिनक्षतिः ननु लौकिकविषयत्वस्यैकस्याभावात् कार्यतावच्छेदकसंबंधस्तादृशविषयतया
प्रत्यक्षेनातीतोदोः× कार्यतावच्छेदकसंबंधाननुगमात् कथमनुगतः कार्यकारणभावः षोढासंनिकर्षभेदेन नानात्वात् न
च प्रत्यक्षेनातीतोदोः× कार्यतावच्छेदकसंबंधस्तादृशविषयतया चप्रत्यक्षनातीतादावतोनव्यभिचारइतिवाच्यं
त्साक्षात्कारत्वनिरूपितविषयत्वमेव कार्यतावच्छेदकसंबंधस्तादृशविषयतया चप्रत्यक्षनातीतादावतोनव्यभिचारइतिवाच्यं
शुक्तिमृगतृष्णादिधर्मिकस्यतद्रजतमेवेदं तज्जलमिवेदमित्यादिप्रत्यक्षस्य दोषविशेषजन्यत्वस्यतादृशविषयतासंबंधेना
तीतरजतजलादावपि सत्वेनव्यभिचारात् तत्रापितद्रजतं साक्षात्करोमीत्यनुभवात् नचतादृशविषयताशेषभ्रमानासाधा
रणसाक्षात्त्वनिरूपितविषयताया लौकिकसंनिकर्षस्यैवदोषविशेषस्यापि जन्यतावच्छेदकत्वप्रसक्त्या वैकल्पिकत्वे
शक्यत्वात् लौकिकस्यैव दोषविशेषजन्यस्यापि रजतप्रकारकप्रत्यक्षस्यरजतनयनगोचरप्रवृत्तिहेतुतया नप्रत्यक्षनिश्चयप्रद २५
तिजनकतावच्छेदकत्वेन तादृशविषयताया लौकिकसंनिकर्षजन्यदोषविशेषजन्यप्रत्यक्षेविशेषणसाधारणत्वान् परुतोपि
भयत्वस्यज्ञानसमानकालीनतया निरूढविषयत्वावच्छिन्नस्य घटादेः प्रत्यक्षप्राक्कालेसत्वात् तादृशविषयत्वेनहेतुत्वव्यभि

चार्यत आह तत्तद्विषयकत्वेति अत्रातीतासद्विषये प्रत्यक्षे चोभयत्रान्वितं तथाचतत्तद्विषयत्वविशिष्टतत्तत्प्रत्यक्षव्यक्ति
त्वेनकार्यत्वं तत्तद्विषयव्यक्तित्वेनहेतुत्वं अत्रचकार्यस्य विषयता कारणस्यतु तादात्म्यं प्रत्यासत्तिः नचतत्तद्विषयकत्व
कार्यतावच्छेदकप्रवेशोव्यर्थः तत्प्रत्यक्षव्यक्तित्वेन पक्षतासंबंधेनान्यात्रापि सत्वेनव्यभिचारकत्वादितिभावः ननुतत्तत्प
रामर्शव्यक्तिप्रत्यक्षे तत्तत्परामर्शव्यक्तित्वेनहेतुत्वे परामर्शप्रत्यक्षसामान्यं प्रत्यपि परामर्शत्वेनहेतुत्वमावश्यकं यद्विशेषयो
रितिव्याप्तिस्तथाचइतेनुव्यवसायेतिव्याप्तिरित्यत आह कदाचिदितिप्रमाणाभावात् तादृशीव्याप्तिरेवनसतीवात
परामर्शव्यापकीभूतज्ञानत्वादिधर्मावच्छिन्नकारणत्वमादायैवचरितार्थानपरामर्शत्वेनहेतुतांव्यवस्थापयतीतिभा
वः यद्यपिविषयस्य प्रत्यक्षेहेतुत्वेमानाभावः नचघटादिविषयस्यनाशदशायामपि तदीन्द्रियसंनिकर्षत्वादुत्तर
काले तत्प्रत्यक्षापत्तिरितिवाच्यं यदायत्रयत्कार्यस्योत्पत्तिस्तदुत्तरव्यवहितप्राक्क्षणे तत्रतत्कारणमितिव्याप्तेः का
रणतासंपादकतया विषयनाशकालावच्छेदेन विषयसंनिकर्षात्मककारणविरहादेव तदसंभवात् नचयदायद्धितिका
र्यस्योत्पादः तदव्यवहितपूर्वक्षणेतद्वृत्तिकार्यस्यकारणमित्येवव्याप्तिः कारणतायाहितविवेति विनष्टविषयकप्रत्यक्ष
वारणार्थं विषयस्यहेतुत्वमावश्यकमितिवाच्यं कार्यकारणभावांतरकल्पनेगौरवेण घटीयपुरुषवृक्षः संयुक्तसम
वायसंबंधमानस्योत्संनिकृष्टरूपांतरस्य प्रत्यक्षप्रसंगेनचतादृशव्याप्तेः प्रतिहतत्वात् नचैवशब्दः प्रत्यक्ष

प्रत्यक्षं कर्णावच्छिन्नशब्दत्वेन विषयस्य हेतुत्वं अन्यथा कर्णानवच्छिन्नस्यापि तस्य प्रत्यक्षत्वापत्तेः स्वावच्छिन्नत्वप्रत्यास
जा॰ सा कर्णस्य तत्र हेतुत्वे कर्णावच्छिन्नसंयोगादेरपि श्रावणप्रत्यक्षप्रसंगादिति वाच्यं तावतापि ज्ञानादेः साक्षात्कारे वि
२६ षयस्य हेतुत्वापत्तेः तथापि सत्संप्रयोगेन्द्रियसंनिकर्षादेः सामान्यकारणत्वे गुरुत्वापत्तीन्द्रियपदार्थानामप्रत्यक्षतया
तत्तद्विषयाणां विशेषतो हेतुत्वं वाच्यं गुरुत्वादिकमादाय तत्कल्पनात् केचित्तु तेषामतीन्द्रियस्यानुरोधेन साक्षा
त्कारनिरूपितविषयत्वेन तादृशविषयतावदन्यतिधर्मशून्यत्वेन वा प्रत्यक्षसामान्यं प्रति हेतुत्वं तत्र च लौकिकसंनि
कर्षजन्यतावच्छेदकतया सिद्धस्य लौकिकाख्यविषयताविशेषस्य कार्यतावच्छेदकसंबंधत्वान्न व्यभिचारः ध
र्मविधविधेयसंबंधविधयापि कार्यतावच्छेदकसिद्धौ बाधकाभावात् नव्यमते कारणताया अतिरिक्तपदार्थत्वेन त
दवच्छेदकलक्षितस्यैव पूर्वसत्त्वापेक्षणादिति वदंति तन्मंदं कार्यतावच्छेदकत्वेन विषयत्वसिद्धावपसिद्धांतत्वात् अ
न्यथा विशिष्टबुद्ध्यादौ विशेषणज्ञानादिजन्यत्वं विशिष्टबुद्धित्वादिना वह्न्यनुमितिं च वह्निव्याप्यवत्तानिश्चयत्वे
न हेतुत्वं न स्यात् व्याप्यवह्नित्वस्यैव तादृशजन्यतावच्छेदकत्वौचित्यात् तत्तादितरत्वादिरिति व्याप्यप्रकारत्व व्याप्याभावप्र २६
कारकेतरत्वादिरित्यर्थः परामर्शत्वस्य विशेषणचतुष्टयघटितत्वात् तत्साफल्यप्रदर्शनार्थं चैत्रावलोकितेत्यादि विशेष
णचतुष्टयमुक्तं घटतद्विषयकत्वेति द्वंद्वः सरत्वप्रत्ययस्य प्रत्येकसंबंधात् तादृशघटत्वेन हेतुत्वे तद्विषयकप्रत्यक्षत्वे

न च कार्यसिद्धानेत्यर्थः इष्टापत्तौ बाधकमाह मानाभावादिति नन्वेतादृशकार्यान्यथानुपपत्तिरेव मानं भविष्यतीत्यत आह अन्यथेत्यादि मैत्रावलोकनादि
… प्रत्यक्षादिसामग्र्या व तादृशप्रत्यक्षस्योत्पत्तेरित्यर्थः तथा चार्थसमाजग्रस्तत्वान्नोक्तरूपं कार्यतावच्छेदकमिति भावः विशिष्टस्मरण
इति वह्निव्याप्यधूमवान् पर्वत इति स्मरणे इत्यर्थः संशयोत्तरं तदाकारकस्य स्मरणस्यापत्तिभयेन स्मृतिजनकतायामपि निश्चयप्रवेशादिति भावः यद्यपि व्याप्य
वत्तादिसंस्कारं प्रति व्याप्यवत्त्वादिनिश्चयत्वेन हेतुत्वात् तादृशसंस्कारानुत्पत्त्यैव व्याप्यवत्तादिसंशयात् तदाकारस्मृतेः संभवः इत्यनुभवस्य निश्चयत्वेन
स्मृतिहेतुतायां मानाभावात् तादृशस्मृतावतिव्याप्तिसंभावना तथापि फलव्यापारयोः प्रति एकरूपेणैव कारणस्य हेतुत्वादिति प्राचीनमते न द
… हेतुत्वे सतेत्यर्थः … पर्वतत्वादिरूपेण व्याप्यवृक्षादिगोचरादपि वह्निपरामर्शात् पर्वतो वह्निमानित्यनुमित्युत्पादात् अनुमितिं प्रति वह्निव्याप्तिधूमव
पर्वतत्वादिनिरूपितेन विशिष्टवैशिष्ट्यावगाहितया विशेषणेन हेतुत्वं न तु धूमवत्पर्वताद्यंतर्भावेन व्यभिचारात् स्मरणोत्तु धूमादिकं न तत्संभवतथा अ
न्यथा धूमत्वेन व्याप्यमगोचरादप्यनुभवात् तादृशरूपेण धूमस्मरणे स्मृते गृहीतग्राहितप्रसंगात् अनुमितिजनकतावच्छेदकरूपेण स्मृता ग्रहेतुत्वात् कथंतरा
तिव्याप्तिप्रसक्तिरिति आचार्यमतेनयं दोषः तन्मते कारणीभूतज्ञाने धूमत्वादिना यादृशवस्तुनो भानं फलेपि तथैवेति नव्याः यत्तु ज्ञानपदस्य करण
व्युत्पत्तिप्राचीनाशंकते अथेति विशिष्टस्य स्मरणं यस्मादिति व्युत्पत्त्या संस्कार इति व्याप्तिरिति तन्न संस्कारानुसरणीतया ग्रिमग्रंथविरोधापत्तेः
केचित्तु यादृशस्मृतौ वह्निव्याप्यवत्त्वनिश्चयत्वेनानुगतरूपेणोद्बोधकविषयात् हेतुत्वं तादृशस्मृतावित्यर्थ इत्याहुः तच्चिंत्यं उपेक्षान्यत्वेत्यादिग्रंथ
स्य व्याप्त्यविषयत्वस्यादिग्रंथस्य च विरोधापत्तेः तत्र हेतुत्वमिति स्मृतौ हेतुत्वमित्यर्थः तथा च व्याप्यवत्तानिश्चयत्वमात्रावच्छिन्नहेतुत्वस्य लक्षणप्रवे
शान्न विशिष्टस्मरणे अतिव्याप्तिरिति भावः उपेक्षात्वं च … तस्या … तत्तद्व्यक्तिस्मृतिजनकतावच्छेदकं भवेन्न तद्वत् न संभवतीत्याशयेनाह उपेक्षा
त्वं हीति संस्कारेति चाक्षुषत्वविहाय उपेक्षात्वं तृणादौ उपेक्षात्वं च … चाक्षुषत्वं कामिनीदर्शनादौ वर्तमानं एकव्यक्तित्वं तृणचाक्षुषसंकीर्णमित्यर्थः
चाक्षुषत्वव्याप्यनानैवोपेक्षात्वं निरूप्य तन्न्यूनवृत्तिमेव स्मृतिजनकतावच्छेदकं यदि ब्रूयात्तदाह आंशिकेति एकस्मिन्नेव ज्ञाने किंचिदंशे, पेक्ष

तस्य क्वचिद्देशे तदभावस्यानुभवादित्यर्थः न च व्यक्तेरसेदत्वस्य स्वभिसादावनुकम्पादेशिकत्वं जातिबाधकमितिवाच्यं रूपहानावसंबंधेवात्तद्
जा॰ तर्भावादितिभावः नापि दंतीसादि तथा तद्गोचरप्रत्यक्षजनकत्वे सति तद्गोचरानिष्टजनकं यत्तदन्यज्ञानत्वेन तद्गोचरस्मृतौ हेतुत्वात् तद्गोचरप्रत्ति
२७ निरूप्युभयजनकत्वे उभयत्वावच्छिन्नजन्यतानिरूपकत्वेन प्रत्येकमात्रत्वनिधर्मावच्छिन्नकार्यतानिरूपकत्वेन वा नतत्प्रत्येकजनकत्वेन च तद्गोचरस्मृति
हेतुत्वे व्यभिचारादभावद्वयगर्भतेति ध्येयं अजिज्ञासितेति तथा च तत्प्रकारकस्मृतौ तद्धर्मे व्याप्यधर्मप्रकारकजिज्ञासाया अजनकं यद्यत्तदन्यज्ञा
नत्वेन हेतुत्वं व्याप्यधर्माणामननुगमात् तद्धर्मव्याप्यप्रकारकजिज्ञासाजनकज्ञानत्वमनुगतमतस्तद्रूपेण स्मृतिहेतुत्वासंभवादत्रापि निषेधद्वय
गर्भतावश्यकीतिभावः तादृशस्यापीति प्रत्यक्षस्य जनकादपीत्यर्थः नापि संस्कारेति तथा च पर्वतधर्मिकव्याप्यवत्तास्मरणं प्रति तदाकारसंस्का
रजनकज्ञानत्वेनैव हेतुत्वान्न व्याप्यवत्तानिश्चयत्वावच्छिन्नहेतुताघटकलक्षणस्य तत्रातिव्याप्तिरितिभावः तज्जनकतावच्छेदकरूपांतरेति निश्चयत्व
भिन्नं संस्कारजनकतावच्छेदकरूपांतरस्यापरिचयादित्यर्थः तथा च निश्चयत्वमात्रस्य तथात्वे स्मृतावपि तद्रूपेण हेतुत्वे फलव्यापारोभयरू
पेण कारणस्य हेतुत्वनियमादिसुलभातिव्याप्तिः तदवस्थैवेति भावः ननु तद्धर्मिकतत्प्रकारकस्मृतावित्यादृशसंस्कारेष्वनुभवस्य तत्प्रकारसंस्का
रजनकज्ञानत्वेनैकरूपेण हेतुत्वं वाच्यं ततो नातिव्याप्तिरत आह अन्योन्येति अत्रावच्छेद्यमवच्छेदकीभूतं च संस्कारजनकत्वविशिष्टत्वव्याप्तिघटि
तमतो संस्कारसमानाधिकरणाभावप्रतियोगितानवच्छेदिकान्यथासिद्धिनिरूपकतानवच्छेदकसंस्कारजनकत्वविशिष्टानुभवत्वकृताद्रू
पकारणताग्रहे नवच्छेदकत्वधर्मिज्ञानविधयावच्छेदकीभूतज्ञानजनकतापेक्षितं एवं अवच्छेदजनकस्यावच्छेद्यत्वेवच्छेद्यस्यावच्छेदकत्वे परी
समिति ध्येयं अन्योन्याश्रयत्वदृत्तरथा पुनरात्माश्रयो द्रष्टव्यः रूपांतरापरिचयादिति स्मृतिहेतु जनकतावच्छेदकरूपभिन्नस्यापरिचयादि
त्यर्थः ननु संस्कारस्मृतिजनकज्ञानत्वेन हेतुत्वमत आह अन्योन्येति तथा च स्मृतिजनकताग्रहे सति संस्कारजनकत्वरूपापेक्षान्यत्वज्ञानं तज्ज्ञानेस २७
ति स्मृतिजनकताज्ञानमित्यन्योन्याश्रय इति काश्चित् ननु तद्धर्मिकतत्प्रकारिकायावत्सो ज्ञानमत्र यत्तादृशसंस्कारात्मत्वादिकृत्वेनानुहेतुकत्व
त्वमेव उपेक्षान्यत्वं निरुच्यतद्विशिष्टतद्धर्मिकतत्प्रकारकनिश्चयत्वेन तादृशस्मृतौ तथाविधसंस्कारे वा हेतुत्वं वाच्यमतो नातिव्याप्तिर्निर्वा॰

अन्योन्याश्रयादित्यत आह संस्कारेति उपेक्षात्मकज्ञानादित्यादिः तदप्रवेशादिति उपेक्षान्यत्वाप्रवेशादित्यर्थः न च स्मृतावि व संस्कारेपि समानाका
रनिश्चयत्वेनैव हेतुत्वादुपेक्षात्मकनिश्चयात् संस्कारानुत्पत्तेरेव दुर्घटितेति वाच्यं समानकारोपेक्षा व्यक्तीनां तत्तद्व्यक्तित्वेन समानाकारसंस्का
रं प्रति प्रतिबंधकत्वोपगमात् उपेक्षाज्ञानोत्तरं तन्नाशसमयेव ज्ञानांतरेण संस्कारोत्पादादित्यभावः न च चाक्षुषचक्षुःसंयोगप्रति चक्षु
स्त्वद्रव्यत्वाभ्यां विभिन्नरूपाभ्यां चक्षुषो हेतुतया फलव्यापारोभयरूपेण करणस्य हेतुत्वनियमे व्यभिचारात् समानाकारज्ञानत्वेनैव स्मृतिजन
कत्वसंस्कारप्रत्येकनिश्चयत्वेन हेतुतया संशयात् संस्कारानुत्पत्तेरेव स्मरणासंभवात् न चाविनिगमनाविरहः समानाकारज्ञानत्वेन संस्कारहेतुत्वे संशयज
न्यानामनंतपिंडसंस्काराणां तन्नाशकत्वेन कारणांतराणां च कल्पनापत्तेरेव विनिगमकत्वात् तथा च स्मृतानाति व्याप्तिः क्वापि न चासंतानजनक
संदेहव्यावर्तनेन निश्चयत्वेन हेतुत्वसंभवे तत्साधारणेन समानाकारज्ञानत्वेन स्मृतिहेतुत्वमन्याय्यं तथा सति उपेक्षाज्ञानस्यापि तज्जनकतया
तद्व्यावर्तकोपेक्षान्यत्वनापि स्मृतिजनकत्वस्यावश्यकत्वापातात् वस्तुतः समानप्रकारकज्ञानत्वेनापि न स्मृतिहेतुता किंतु स्मृतिसामान्यज्ञा
नत्वमात्रेण तद्धर्मिकतत्प्रकारकस्मृतिं प्रति तादृशसंस्कारत्वेन हेतुत्वस्यावश्यकतया तत एवातिप्रसंगभंगादिति प्राञ्चः यत्तु संस्कारप्रस
दि समानाकारकज्ञानत्वेनैव हेतुत्वं न तु तादृशनिश्चयत्वेन गौरवात् संशयेन संस्कारोत्पादेपि उद्बोधकसमवधानविरहादेव ततः स्मरणानुत्पादसंभ
वादिति तन्न संशयजन्यत्वे संस्कारव्यक्तीनां नाशार्थं हेत्वंतरकल्पनागौरवप्रसंगात् यस्य पुंसः परसंस्कारस्तेपि तत्सदृशवस्तुविशेषदर्शनादेव पटस्मृतिः
तत्पुरुषीयपटस्मृतिसामान्यं प्रति तत्पुरुषीयतादृशवस्तुविशेषदर्शनत्वेनानुगतैकरूपेणैवोद्बोधकस्य हेतुतया संशयजन्यसंस्कारसत्त्वेतादृशवस्तु
दर्शनदशायां तत्पुरुषीयस्मरणापत्तिं वारणमपि वारयितुमशक्यत्वाच्चेति दिक् अन्ये तु निश्चयत्वघटकदलद्वयस्य विशेष्यविशेषणभावेन गुरुतरकार्यका
रणभावद्वयकल्पनामपेक्ष्य लाघवेन तद्विशेष्यकतत्प्रकारकसंस्कारं प्रति तद्विशेष्यकतदभावप्रकारकज्ञानत्वेन प्रतिबंधकत्वं तद्विशेष्यकतत्प्रकारकज्ञा
नत्वमात्रेण हेतुत्वमित्युत्पत्स्य कल्पनमेवोचितं संशयोत्तरवर्तिनिश्चयादपि संशयनाशानंतरमेव संस्कारोत्पादसंभवादिति प्राञ्चः तन्मंदं तत्प्रकारत्वान्य

प्रकारत्वानिरूपिततन्निष्ठविशेष्यताकज्ञानत्वपर्यवसितेन निश्चयत्वेनहेतुतायां निश्चयत्वघटकदलस्यैवासंभवात् एतेनव्याप्यसंशयोत्तरव्या
आ॰ प्यतत्वस्यसंशयाकारस्मृतेः उत्पत्तिमेयेनव्याप्यवत्तायाः स्मृतौ तन्निश्चयत्वेनहेतुत्वं किंतुव्याप्यवत्ताज्ञानत्वमात्रेणाव्याप्याभावप्रकारक
२९ ज्ञानत्वेनहेतुत्वादेवव्याप्याभावप्रकारकत्वघटितस्यव्याप्यसंशयस्य स्मृतावसंभवात् नचव्याप्याभाववत्तास्मृतिंप्रतिव्याप्याभाववत्ता
निश्चयत्वेनव्याप्यवत्तास्मृतिंप्रतिपि व्याप्यवत्तानिश्चयत्वेनहेतुतायां प्रमाणाभावेस्मिन्तदप्युचितं उभयथैवसंशयाकारस्मृतेर्वारणसंभ
वादितिवाच्यं व्याप्यवत्तास्मृतौ व्याप्यवत्तानिश्चयत्वेनहेतुत्वे व्याप्याभावप्रकारकत्वस्य हेतुतावच्छेदककोटिप्रवेशे गौरवं व्याप्याभा
वत्तास्मृतिंप्रति तु व्याप्याप्रकारकत्वघटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतुत्वेनानवच्छेदक लाघवमित्यस्यैवविनिगमकत्वात् तथा च व्या
प्यवत्तास्मृतौ नातिप्रसंगशंकापि निश्चयत्वेन तत्राहेतुत्वादिसपिमतंपरास्तं प्रागुक्तदिशा निश्चयत्वस्यदलद्वयाघटितत्वात् पर्वतोवह्निव्याप्याभाव
वान्नवेत्यादिसंशयादपिताद्दशसंशयाकारस्मृत्यापत्तिभावेन व्याप्याभाववत्तास्मृतिंप्रत्यपि व्याप्याभावाभावाप्रकारत्वघटितेन व्याप्याभाव
वत्तानिश्चयत्वेनहेतुताया आवश्यकत्वेनविपरीत गौरवाच्चेतिदिक् केचित्तु संस्कारप्रतिनिश्चयत्वेनहेतुत्वेनावपि यत्रायंघटइत्यादिप्रत्य
क्षानंतरं दिवसांतरे अयंनघटइत्याकारिकाधीस्तत्रताद्दशज्ञानद्वयेनक्रमाज्जनितस्यघटत्वतदभावगोचरसंस्कारद्वयस्य सत्वात् अयंघटो
नवेतिसंदेहात्मकस्मृत्यापत्तेः नचविरुद्धोभयकोट्युल्लेखकोद्बोधकसमवधानविरहान्नस्मृत्यापत्तिरितिवाच्यं यस्यपुंसोघटत्वतदभावयोः
संस्कारसत्वेनतदुभयसदृशवस्तुदर्शनादेवतदुभयस्मृतिः तत्पुरुषीयघटत्वतदभावस्मृतिसामान्यं प्रत्येव तत्पुरुषीयतादृशवस्तुदर्श २०
नस्यानुगतरूपेणोद्बोधकस्यहेतुत्वेन तत्पुरुषीयोद्बोधकसमवधानस्यापिसंभवात् तथाचताद्दशसंशयाकारस्मृतेर्वारणार्थंद्दृष्टवा
... घटत्वप्रकारकस्मृतौ तदवच्छेदेन घटत्वाभाववत्तास्मृतिसामग्र्याः स्ताद्दशधर्मिकघटत्वाभाववत्तास्मृतौ च ताद्दशघटत्वप्र...
स्मृतौ सामग्र्याः प्रतिबंधकस्यप्रामाणिकतया स्मृतिजनकतायामिव संस्कारजनकतायामपि निश्चयत्वं निवेशनीयं अन्यथैव ताद्दश...
संदेहाकारस्मृतेर्वारणादित्याहुः तच्चिंत्यं संशयजन्यपिंडसंस्कारव्यक्तीनां नाशानां हेत्वंतरकल्पनाभि... संस्कारजनकतायां निश्च

यत्वप्रवेशस्यैवलाघवेनोचितत्वादितिसंक्षेपः तथात्वमितिस्मृतिहेतुत्वमित्यर्थः तथाचनिश्चयमात्रेणस्मृतिप्रसंगहेतुत्वान्ततत्रत्वप्र
वातिप्रसंगः अनुभवत्वंचजातिः ननुस्मृत्यन्यज्ञानत्वं तेनज्ञानत्वापेक्षया गुरुतया ननुस्मृतिकारणतावच्छेदकत्वहानिरिति
भावः द्वित्राद्यनुभवस्थलेस्वजन्यस्मरणानेकसंस्कारसाराणपि संस्कारांतरसत्वात् तदुत्तरस्मरणसंभवस्ततुक्तं सकृदिति वस्तु
तस्तुस्वविषयकस्मृत्युत्तरमननुभूतस्येत्यर्थः एतेनसमानप्रकारकत्वेनस्मृतेःसंस्कारनाशकत्वे द्वित्रिशोनुभूतस्याएकस्मृत्या संस्कारशतनाशात्
स्मरणांतरासंभवेसकृदपदं तन्नुसरणं व्यर्थमितिपरास्तं नचैतत् स्वानुभवीयानुव्यवसायस्यैवस्वानुभवांतरत्वात् सकृदनुभवत्ववत्त्वेनासिद्धमितिवा
च्यं स्वतःप्रामाण्यभियानुव्यवसायस्य व्यवसायाकारवत्त धर्मवद्धर्मिविषयकत्वस्वीकारात् विषयांतरसंचारादिना नुव्यवसायानुत्पत्तिसंभवाद
तिभावः स्मरणांतरमिति कालांतरइतिशेषः तेनैकसंस्कारेणैवक्वचित्क्रमिकस्मरणद्वयोत्पादसंभवेपिनक्षतिः प्रसंगादिति तथाचानुभव
त्वेनहेतुत्वे व्यभिचाराभिप्रायेणैवतथाहि वाच्यमितिस्मृतसनिव्याप्तिस्तदवस्थैवेतिभावः ननुस्मरणात्मकफलेनसंस्कारनाशेहेतुः
तथाचघटः घटश्च द्रव्यमित्याकारकसंस्कारेणोद्बोधकवशात् जनितया घटोद्रव्यमित्याकारकस्मृत्योत्तरनाशे पश्चात् घटोद्रव्य
मित्याकारकस्मृतेरनुत्पत्तिप्रसंगादतआह समानेति तथाचघटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशत्वावच्छिन्नंप्रतिताद्दशस्मृ
तित्वेनहेतुत्वात् ताद्दशस्मरणस्यहेतुत्वेपिघटधर्मिकताद्दशस्मृतेरभावादेवनोक्तस्मृत्यात्मकेनसंस्कारस्यनाशः नचघटधर्मि
कद्रव्यत्वप्रकारकसंस्कारनाशत्वावच्छिन्नसामग्रीसत्वादस्मृत्यात्मकेनद्रव्यप्रकृतेपितदवच्छिन्नस्यास्तु दोषदुर्वारइतिवाच्यं घटधर्मिकद्रव्यत्वप्रका
रकसंस्कारस्यैवसामग्रीवशेनघटदशांतरे वापदार्थांतरं गमकत्वानियमेनपदार्थांतरगोचरताद्दशस्मरणात्मकविशेषसामग्रीविरहादेव
घटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशत्वावच्छिन्नस्योत्पत्त्यसंभवादितिभावः स्मृत्यात्मकेनस्यापिसंस्कारस्याविनाशे क्रमेणप्रसंगो।

श्रा. चरमस्मृतिरूपतत्सहसंभवात् क्रमिकेपुक्ते क्वचिद्दिनद्वयानंतरोत्पन्नेति तदर्थः यद्यप्येवमपि कालरोगादिना संस्कारनाशकस्थले अभिचारदूति का
लरोगादिजन्यसंस्कारनाशस्येनैव स्मृतिजन्यत्वं वा च तत्रकालरोगादिजन्यत्वं तत्र दृढकूटातिरिक्तं दुर्वचं च तथा चतेषां विशेषणविशेष्यभावविनिग
२९ मकाभावादनंतकार्यकारणभाव प्रौव्यं तत्र स्मृतिव्यक्तित्वेन तत्तत्संस्कारनाशं प्रति हेतुत्वमेवकार्यवान् युक्तं अतः सकृदनुभवरूकेपि चरमस्मृ
तेस्तद्व्यक्तित्वेनैवत्वन्नाशात्संभावनास्मरणोत्तरमस्मरणप्रसंगः तथापि रोगादिनाश्यत्वावच्छिन्नस्य संस्कारस्य व्याप्यजातिविशेषस्यैव स्मृतिनाश्यतावच्छे
दकतया सिद्धत्वात् तत्तत्संस्कारव्यक्तिं प्रति तत्तत्स्मृतिव्यक्तित्वेन हेतुत्वं वस्तुतोयत्स्वरूपीय यत्प्रकारकसंस्कारो नरोगादिनाश्यः तत्स्वरूपीयतत्प्रकारकसं
स्कारनाशसामान्यं प्रत्येव तत्स्वरूपीय तत्प्रकारकस्मृतित्वेन हेतुत्वे बाधकाभाव इति तत्रैवस्मरणोत्तरस्मरणप्रसंग उक्तदूषणदोषः केचित्तु रोगकालादि
जन्यतत्संस्कारनाशभेदकूटस्य युगपदेवविशेषणत्वे नैवविशिष्टापरविशिष्टत्वेन एकविशिष्टापरवैशिष्ट्यप्रवेशे कार्यतावच्छेदकस्य गुरुत्वापाता
त् अतोनंतकार्यकारणभावशंकैवेनेत्यभिवदंति सम्प्रत्यालंबनपदमित्यादिपदादेकधर्मिकनानाप्रकारकसंस्कारपरिग्रहः अभेदमवधेयं तद्वि
शेष्यकतत्प्रकारकसंस्कारनाशं प्रति तादृशस्मृतेः कार्यसहभावेनैव हेतुत्वं वक्तव्यं अन्यथास्मरणजन्यसंस्कारव्यक्तीनां क्षणिकत्वापत्तेर्नाश
कीभूतस्य स्वजनकस्मरणस्यैव सहोदुत्पत्त्यनंतरमेवनाशसंभवात् नचैवमपि यत्रघटत्वप्रकारकानुभवोनंतरं युगपत्तादृशसंस्कारोनुभवात
स्व ततश्चघटत्वप्रकारकसंस्कारांतरस्मरणं तत्र द्वितीयस्य घटत्वप्रकारकसंस्कारस्य क्षणिकत्वापत्तिर्द्वितीयसंस्कारकालीनस्मरणोत्पत्त्य
नंतरक्षणेपिसत्त्वादितिवाच्यं उपेक्षान्यज्ञानस्यैव संस्कारजनकतया तत्र द्वितीयानुभवस्योपेक्षात्वस्वीकारेणा ततः संस्कारस्यैवानुत्पत्तेः प्रति २९
योगितया संस्कारनाशत्वावच्छिन्नं प्रति प्राक्क्षणवृत्तित्वविशिष्टस्वजनकतासंबंधेन स्मृतित्वेन हेतुत्वमित्यपि कश्चित् वस्तुतः संस्कारनाशं
प्रति समानाकारस्मृतित्वेनैव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नशब्दानामपि नाशात् प्रतिसामानाधिकरण्यप्रत्यासत्त्या ज्ञानत्वसुखदुःखत्वादिप्र
कारेणैव हेतुत्वं नतु स्वोत्तरोत्पन्नविशेषगुणत्वादिना तथात्वं स्वत्वस्यतत्तद्व्यक्तिविश्रांतिकत्वेनानंतकार्यकारणभावापत्तेः एवंच ज्ञा
नसुखदुःखादीनां स्वोत्तरक्षण एवविनाशवारणाय प्रतियोगितासंबंधेन ध्वंससामान्यं प्रति स्वप्रतियोग्यधिकरणक्षणवृत्त्यत्वसंबंधेन

ध्वंसत्वेनाप्यनुगतरूपेण हेतुत्वं कल्प्यमतो ज्ञानसुखादीनामिव स्मृतिजन्यसंस्कारस्यापि न क्षणिकत्वं स्वप्रतियोग्यधिकरणतादात्म्यसंबंधेन ध्वंसता
याः संस्कारादौ द्वितीयलक्षण एवसंभवादधिकरणत्वं न्देह कालिकसंबंधेन प्रवेश्यमतो नियमस्य ज्ञानेक्षादेः क्षणिकत्वप्रसंग इति मदेकपरिशीलितः पंथाः
यत्स्मृतिजन्यसंस्कारनाशस्य तत्र चरमस्मृत्यनंतर नष्टसविषयप्रतियोगिकत्वस्य लाघवेन कल्पनात् तादृशप्रतियोगिनः प्रथमस्मृत्यनंतरमसत्त्वान्न स्मृ
तिजन्यसंस्कारस्य क्षणिकत्वमिति तन्न तथासति सकृदनुभवजन्यसंस्कारनाशस्यापि तत्रस्य चरमस्मृतिप्राक्कालीनसविषयकव्यक्तिप्रतियोगिक
त्वकल्पनया तद्व्यक्तिविरहादेवनैकस्मरणोत्तरं तदुत्पादसंभव इत्यनुभवत्वेनापि स्मृतिहेतुताया दुरुच्छेदापत्तेः केचित्तु रूपादिरूपजातिरूपादिरिव संस्कारेप्र
त्यपि समानाकारसंस्कारत्वेनैव प्रतिबंधकत्वं धारावाहिकस्थले अनेकसंस्कारव्यक्तिकल्पनमपेक्ष्य तत्कल्पने लाघवात् एवंचनकस्यापि संस्कारस्य
क्षणिकत्वं प्राक्तनसंस्कारसत्त्वेन स्मरणाव्यवहितोत्तरक्षणे संस्कारानुत्पादात् नाशोत्तरमुत्पन्नस्य च संस्कारस्य तदानीं नाशकाविर
हात् क्षणिकत्वासंभवात् नचयत्रैकस्मृत्यनंतरमेवस्मरणांतर प्राक्तनसंस्कारनाशो पश्चाच्च प्रथमस्मरणेन संस्कारोत्पादः तत्रत्यसंस्कारस्या
क्षणिकत्वं दुर्वारमिति वाच्यं संस्कारस्य कार्यसहभावेनैव स्मृतिहेतुत्वादेकस्मृति द्वितीयक्षणे समानाकारस्मृत्यंतरासंभवादिसाहुः
तन्मंदं यत्रघटपटादिविषयाकारकसंस्कारोत्तरं क्रमेणसकृदनुभवतस्यघटपटस्य स्यस्य च प्रत्येकस्मरणं तत्रपुनस्तादृशघटस्य स्मरणानु
पपत्तिप्रसंगात् क्रमिकस्मरणद्वयसमूहालंबनसंस्कारनाशदशायाम् एवस्मरणस्यापि नाशतेन पुनस्तथा प्रसंस्कारजननासंभवादि
तिदिक् ननुस्मृतेश्च संस्कारजनकता सत्वएव तद्रूपस्मृतिजनकत्वं वाच्यं तदनासिद्धं संस्कारं प्रत्यप्यनुभवेनैव हेतुत्वादत आह ज्ञो
यतेचेति तथाच संस्कारं प्रत्यनुभवत्वेन हेतुत्वे दृढतरसंस्कारं प्रति पुनःपुनः स्मरणत्वेन हेतुता न स्यात् सामान्यसामग्रीविर
हादतः संस्कारं प्रत्यपि निश्चयत्वमात्रेण हेतुत्वमितिभावः प्राचस्तु समानाकारस्मृतित्वेन तथाच तत्तदात्मीयसंस्कारना
शसामान्यं प्रत्येव तत्तदात्मीयचरमस्मृतिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वं युक्तं अंतरानंतसंस्कारध्वंसैकत्वनागौरवं।
५४

५

रेऽवच्छेदकलाघवाच्च सकलसंस्काराणां चरमस्मृतिपर्यंतस्थायित्वेप्युद्बोधकविरहेणैव मध्ये स्मरणाभावात् तथा च सकृद
नुभूतस्यापि स्मरणे तु स्मरणासंभवादनुभवत्वेन स्मृतिहेतुतायां बाधकाभाव इत्यत उक्तं जायते चेत्यादीत्याहुः तन्निरस्य तावता
स्मृतेः संस्कारजनकत्वसिद्धावपि स्मृतिजनकत्वाप्राप्तेः यत्र स्वसदृशपदार्थज्ञानत्वादिनानुगतरूपेणैवोद्बोधकस्य स्मृतिहेतुत्वं
तत्रांतरास्मरणधारावसंगाच्च नेत्याशु ननु स्मृतेन समानाकारज्ञानत्वेन हेतुत्वे सकृदनुभवस्थले स्मृतिजन्यानेकसंस्कारकल्प
नागौरवापत्तेः किंतु तादृशानुभवत्वेनैव तथात्वं न च संस्कारस्य फलनाश्यस्य तया सकृदनुभवे हि तस्य स्मरणद्वयानुपपत्तिः
चरमफलमात्रवृत्तिस्मृतित्वव्याप्यजातिविशेषस्यैव संस्कारनाशहेतुत्वादित्यत आह जायते चेत्यादि तथा च द्वितीयसं
स्कारस्य कार्यप्रयोजकतया चरमस्मृतिनिष्ठजातिकल्पनायामभवतादिति भाव इत्याहुः ननु द्वित्वेन संस्कारगताजातिमा
नाभावात् परं तु प्रतिस्मृत्युद्बोधकसंपत्तिः साधनकारणनियम्यात्तस्याः कार्यतानवच्छेदकत्वेपि दोषाभावात् वस्तुतो नुभवत्वेन सं
स्कारजनकतायां दोषमाशंक्यत आह परिस्फुटेत्येवेति तथा च विनाप्यनुभवं स्मृतेरनंतरं संस्कारस्य संभवात्तयानुभवत्वं संदिग्धव्य
भिचारकं अतो व्याभिचारशंकया प्रतिबंधात्तद्रूपेण हेतुत्वं कल्प्यते किंतु निश्चिताव्यभिचारकेण ज्ञानत्वादिनैव ज्ञानं विना संस्का
रावश्यकत्वनियमीकारादिति भावः अनुभवत्वादिविशेषधर्मपरित्यज्यते व्यापकेन निश्चयत्वेन स्मृतिहेतुतोपगमे घटादिप्रत्य
क्षदंडादिकं परित्यज्य द्रव्यत्वादिना हेतुः स्यादत आह इदमेव चाग्रे न च प्रमाणव्यभिचारकेण कारणत्वकल्पनानुद्यय इत्यर्थः
अन्यत्र विशिष्टबुद्ध्यादौ तथा च यत्र विशिष्टबुद्ध्यादौ विशेषणज्ञानत्वादि विशेषरूपेण हेतुतायां व्यभिचारशंका तत्रैव विशेषणवि
षयकसामान्यधर्मेण हेतुत्वं घटादौ तु दंडत्वद्रव्यत्वयोरुभयोर्निश्चितो व्यभिचारकत्वाद्दंडत्वविशेषधर्मेणैव हेतुत्वं न तु तद्व्यापक

द्रव्यत्वादिना तद्रूपेण हेतुतायामन्यथासिद्धेरिति भावः कार्यतावच्छेदकत्वं विशेषरूपस्यैवमुक्तं न तु सामान्यसंदिग्धव्यभिचारात् अत
एव विशेषणज्ञानत्वेन तद्विशिष्टानुभवत्वमेव न तु तादृशज्ञानत्वेनेति प्राचीनैरुक्तमभिप्रायेणाह हेतुतावच्छेदकेति ननु स्मृतेः संस्कार
जनकत्वेपि सिद्धं तदस्मात् आह अभिहितं चेति स्मृतौ नाममिति स्वकार्यसंस्कारविरोधीनाशको यासामित्यर्थः तथा चावयवस्योत्तर
क्रियादिधीसंभवस्तद्धटः प्रत्येकपदार्थस्मृतीनां तावत्कालमसत्त्वादितिटीकार्थः साक्षात्कारत्वं व्यापारमद्वारीकृत्यपरामर्शजन्यत्वं
न तु स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वं तेन बाधादिस्थलीयपरामर्शतृतीयक्षणे जातानुमितौ नाव्याप्तिः न तु स्वाव्यवहितप्राक्का
लवृत्तिपरामर्शजन्यत्वं तदर्थः स्मृतिविशेषेतिव्याप्तितादवस्थ्यात् वस्तु विशेषस्मृतिं प्रति साध्यव्याप्यवत्तानिश्चयत्वप्रकारेण
नुगतरूपेणोद्बोधकस्य हेतुत्वसंभवेन स्यामति व्याप्तिः पूर्वकल्पापेक्षया गौरवं चेदुत्स्वरसः कश्चिदित्युक्ताकूतं चितः ननु वह्नि
व्याप्यादिविशिष्टवैशिष्ट्यबुद्धौ वह्निव्याप्यादिप्रकारकनिश्चयत्वेनैव हेतुत्वं ननु ज्ञानत्वमनंतभावविशेषणाचरो नुद्बोधसंस्कार
सत्वेपि विशिष्टवैशिष्ट्यप्रत्यक्षापत्तेः तत्त्वे विशिष्टवैशिष्ट्यप्रत्यक्षप्रति तत्तद्विशेष्यादिज्ञानव्यक्तीनां विशिष्टकारणत्वस्य प्रति बंधकत्वस्य
वाकल्पनायां गौरवं न च स्मृत्यादिस्थले व्यभिचारः अग्रे निरस्यत्वात् तथा च वह्निव्याप्यधूमवत्पर्वतवानिसाकारकप्रत्यक्षे अति
व्याप्तिरतस्तद्वारणार्थं प्रकारांतरोनुसरणे ततो पि स्मृसतिव्याप्तिनिरासः संभवतीत्याशयेनाह किंचेति तत्रानुमितौ तदेवेति
अर्थात्पक्षे धर्मिकव्याप्यवत्तादिनिश्चयत्वेन हेतुत्वस्य कक्षणप्रविष्टत्वेनुमितिमात्रे संभवापत्तेरिति भावः ननु विशेषकत्व
कारकस्मृतिप्रत्यक्षितदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनेव हेतुत्वात्तत्रातिव्याप्तिरेव मर्षीत्यत आह एकतरेति तथा चान्वय-

५

जा. व्यभिचारानोक्तरूपेण तत्र हेतुत्वमिति भावः ननु ज्ञन्यतापि तदुभयवैशिष्ट्यावगाहि स्मृतित्वेनैव वाच्या तथा च कार्यतावच्छेदकावच्छि
न्नस्यासाधारण्योक्तदोष इत्यत आह अन्यथेति नियमेन नियमतः प्रसंगादिति एकधर्मिकस्मृतिसामग्र्या एवापरधर्मिकस्मृति
३२ सामग्रीत्वादिति भावः अनियमेन विशेषतो नियामकाभावेनेत्यपि कश्चित् ननु तद्विशेष्यकतत्प्रकारकस्मृतौ तादृशनिश्चयत्वे
न हेतुत्वं यथापि वाच्यमेव नात ःस्मरणस्योभयविशेष्यकत्वपरंतूभयवैशिष्ट्यावगाहि निश्चयत्वेनापि हेतुत्वं यद्विशेषणयो
रिति न्यायादेव वक्तुमतःस्मृत्स न्निव्याप्तितदवस्थैवमेवेत्यत आह समानेति तथा च यत्प्रकारकस्मृतिसामान्यं प्रति तत्प्रकार
कत्वज्ञानत्वेन हेतुतयैव यद्विशेषयोरिति न्यायस्य सामञ्जस्यान्न तदुभयवैशिष्ट्यावगाहि निश्चयत्वेनापि हेतुत्वं गौरवादि
तिभावः तत्र ज्ञानस्मरणयोः विशेष्येति तद्विशेष्यकतत्प्रकारकज्ञानत्वादिनैवेत्यर्थः नानाविधव्याप्त्यनुमितिष्वपि तन्मतेनो
क्तव्यभिचारेति हेतुतामतइत्यनेन प्रागुक्तदोषः सूचितः नितरामिति नातिप्रसंगशंकापीत्यनुषज्यते तथैव व्याप्तिवारधर्मिविरोधी
त्यादिरूपेणैव अतएवोक्त व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वादिना जनकत्वस्य लक्षणे प्रवेशादित्यर्थः ज्ञानत्वेन निश्चयत्वेन
हेतुत्वेपीत्यपि नास्वरसः सूचितः सच व्याप्यवत्तावच्छिन्ने योग्यानुपलब्धेर्विरहात्तदवच्छिन्नाभावस्यातीन्द्रियत्वया नतत्प्र
तियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं हेतुः अभाव लौकिकप्रत्यक्षं प्रत्येव तस्य हेतुत्वादित्याद्यधिकं सामान्यलक्षणायां ३२
वक्ष्यते ननु व्याप्यपक्षोभयवैशिष्ट्यावगाहि निश्चयत्वं तदुभयनिरूपित सांसर्गिकविषयताकनिश्चयत्वं तथा चतादृशानि
त्त्वेव वह्निव्याप्यधूमपर्वत इति ज्ञानादप्यनुमित्यापत्तेः पक्षे साध्यव्याप्याधारतावगाहि त्वस्यावच्छेदकत्वे धूमवान्
तेवह्निव्याप्यधूमइत्यादि लिंगधर्मिकपरामर्शस्यासंग्रहः तत्र व्याप्ये पक्षाधेयत्वस्यैवाभानात् किं च यदि[illegible]

प्याभावप्रकारकान्यत्वे सति व्याप्यविशेष्यकपक्षाभावप्रकारकान्य व्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानत्वं वतादृशानत्वं तच्च
तथा च तस्यापि विशेषणविशेष्यभावभेदकृतकार्यकारणभावद्वयापत्तिरतो व्याप्यवत्पक्षनिश्चयत्वेनाधेयतया पक्षप्रकारक
व्याप्यधर्मिकनिश्चयत्वेन वा यथानुभवमनुमितिहेतुत्वं वाच्यमलं तादृशस्मृतावतिव्याप्तिस्तदवस्थैवमेवेत्यत आह ज्ञानविषयकत्वे
नेति न व्याप्तेः व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वे वह्निव्याप्यवान् पर्वत इति व्याप्तिस्त्वनुमितौ विशे
षतोऽत्र परामर्शस्यैकरूपेण हेतुत्वादतउक्तं व्याप्यविषयकत्वेनेति तथा चापत्तेः साक्षात्कारतया परामर्शोपनीतत्वात् तद्विषयत्वे
त्वानियमान्नातिव्याप्तिरिति भावः तन्मते पक्षधर्मोऽगृहीताप्रामाण्यकत्वस्याहार्यत्वस्य वाधिकस्यापातिज्ञानत्वावच्छेदेन
अन्यथा स्थाणुत्वाद्यभावेतर स्थाणुत्वादिप्रत्यक्षस्थलेपि व्याप्यदर्शनवशेन स्थाणुत्वादेरापत्तिप्रसंगादिति ध्येयं एतेन सवि
षयकत्वप्रवेशेन परास्तमिति परेणान्वयः विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वं व्यवस्थापितं विशिष्टवैशिष्ट्यबुद्धिरपि विशिष्टबु
द्धितया तद्धर्मापेक्षितस्य विशेषणज्ञानस्यैव विशेषणतावच्छेदकप्रकारकत्वसंभवात् विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्र
कारकज्ञानस्य व्यभिचारो नत्यादित्याशयेनोक्तं विशेषणविषयकइति हेतुत्वस्येति कल्पनादिति परेणान्वयः ननु संबंधद्वयेन
वहेतुत्वे प्रत्येकं व्यभिचारात् विशिष्टज्ञानत्वावच्छिन्नं प्रति अनुगते न हेतुत्वासंभव इत्यत आह निर्विकल्पात्मकस्य वा स्मरण
स्येति विशेषणाप्रकारस्यकस्मरणस्येत्यर्थः तेन व्याप्यत्वादिस्मरणस्य सविकल्पकत्वेपि न क्षतिः हेतुत्वस्य कल्पनादिति
योजना तथा च साक्षात्संबंधेनैव सर्वत्र हेतुत्वं न तु संबंधद्वयेनेति भावः ननु विशिष्टबुद्धित्वं स्मरणसाधारणं तत्र व्यभिचा
रकत्वं विशेषणाधीतान्यतावच्छेदकं किंच समानप्रकारकत्वेन ज्ञानस्मृतयोः कार्यकारणभावस्य[illegible]

९

जा. संभवोपीत्यत आह अनुभवेत्यादेवेति तस्या हेतुत्वस्य कल्पनादित्यन्वयः तत्वाविशेषधीधियः नन्वेवमपि विषयोपरक्तकृत्या
दिसाक्षात्कारे व्यभिचारएवेत्यत आह नियमतइति नियमकारेणाऽत्तदंशीकृत्येत्यर्थः तथा चाक्लृप्तेपि पंचभीतिनयत्रापेक्षा बुध्या
३२ कृतिर्जनितायत्रवाप्रथमांचे कीर्षितं तत्ता विषयोपरक्त मुपादानप्रत्यक्षपथ्या कृतिः तत्रकृतिसाक्षात्कारपक्षे विषयस्यैवकल्पने
पिनासंगतिरितिध्येयं नत्वोक्तप्रणाल्या व्यभिचारवारणेपि ज्ञानत्वमंतर्भाव्य हेतुत्वे मानाभाव इतिवाच्यं विशेषणगोचरा
नुबुद्धेः संस्कारदशायां विशिष्टप्रत्यक्षानुत्पत्त्यर्थं तन्निवेशस्यावश्यकत्वादितिभावः नव्यास्तु यागादिव्यापारतया सिद्धस्ये
वादृष्टस्यैवानुभवव्यापारतया सिद्धस्य संस्कारस्यापि सविषयकत्वे मानाभावात् विशेषणविषयकत्वेनैव विशिष्टबुद्धौ हेतुत्वं सं
स्कारद्वारा समानाकारकनिश्चयत्वेनैव स्मृतिहेतुत्वेप्यतिप्रसंगाभावात् विशेषणविषयकत्वेनैव न च संस्कारस्य निर्विषयक
त्वे घटपटादिसमूहानुभवस्य यत्र पटांश एवोपेक्षा ले तत्र तादृशज्ञानस्य घटस्मृत्युपधायकस्वजन्यसंस्कारसंबंधेन सत्वात् घटस्येव प
टस्यापि स्मरणापत्तिः यस्य पुंसः पटानुभवोनंतरं तत्सदृशस्य दर्शनादेव पटस्मृतिः तत्पुरुषीय पटस्मृतिसामान्यं प्रति तदीय तादृशा
नुदर्शनत्वेनानुगतरूपेणोद्बोधकस्य हेतुतया तत्सत्वदशायां तदुद्बोधकविरहस्यापि वक्तुमशक्यत्वादिति वाच्यं स्वजन्यसंस्कारद्वा
रा तद्धर्मिकतत्प्रकारकोपेक्षान्यतादृशनिश्चयत्वेन तथाविधस्मृतिं प्रति हेतुत्वादुक्तस्थले च पटोपेक्षान्यत्वविशिष्टस्य पटधर्मिकपटत्वप्र
कारकज्ञानस्य संस्कारद्वारा विरहादेव पटस्मृत्यापत्त्यसंभवात् तथापि संस्कारजनकतायामपि उपेक्षान्यत्वस्य प्रवेशनीयतया गौर ३२
वानवकाशात् अन्यथोक्तस्थले घटत्वप्रकारकसंस्कारदुर्वारत्वापत्तेः यत्तु स्वध्वंसद्वारैवानुभवस्य स्मृतिजनकत्वसंभवात् अतिरि
क्तः संस्कार एव नास्ति कस्पर्शादेर्विलयकत्वाच्चेति तन्न यस्य पुंसः पटानुभवोनंतरं क्वामिकं तत्तुष्टयं च प्रत्यक्षाद्युत्पत्तिव्यवहितक्ष

अएव दशादिनेषु पटस्य दर्शनस्मरणानि उपेक्षात्मकान्युत्पन्नानि तस्य च दिन एव स्मरणोत्तरमपि घटस्य पुनः स्मरणप्रसंगात् स्वध्वंसद्वारानुभवस्य तत्र सत्वात् तत्र स
दृशस्मरणे चोद्बोधकस्य विशेषतो हेतुत्वं कल्पनीयमिति त्रस्मत्ससुत्पादनमपेक्ष्य संस्कारस्य स्मृतिहेतुत्वकल्पनयैव तत्संपादने लाघवात् संस्कारस्य फलनाशतया
प्रथमस्मरणेन तन्नाशादेवाऽस्मते पुनः स्मरणासंभवात् न च तत्र स्मरणपक्षेक्षण एव तत्त्वस्मरणास्योत्पाद प्रसंगेन संस्कारहेतुत्ववादिनापि तत्रोद्बोधकशेष तो
हेतुत्वं वक्तव्यमिति सांप्रतं प्रत्यक्षादिसामग्र्याः प्रतिबंधकत्वादेव तत्र स्मृतिप्राक्क्षणे स्मरणासंभवादिति प्राहुः केचित्तु स्मृतिनाश्यतावच्छेदकतयैव संस्कारस्य स
विषयकत्वसिद्धिः तद्धर्मिकतत्प्रकारकसंस्कारनाशं प्रत्येव तादृशस्मृतित्वेन हेतुत्वात् स्मृतित्वेन सामान्यतः संस्कारनाशं प्रति हेतुत्वे घटस्मरणादेव निखिलसंस्कार
नाशादनुभवोत्तरविनाशकाले पटादिस्मरणानुपपत्तेः नहि तत्र घटस्मृतिरेव स्वजन्यसंस्कारद्वारा पटादिस्मृतिं जनयितुमीष्टे भिन्नविषयकत्वात् अन्यथाति
प्रसंगात् न वा पटादिधीरेव तत्र संस्कारद्वारा संभवति तज्जन्यसंस्कारद्वारस्यापि घटस्मृत्यैव नाशात् न च तद्धर्मिकत्वाद्यपेक्षया लाघवेन तद्धर्मिकतत्प्रकारकस्मृ
तिनाश्यतावच्छेदकसंस्कारनिष्ठवैजात्यमेव कल्पयितुं युक्तं घटत्वप्रकारकस्मृतिनाश्यतावच्छेदकजातेर्घटपटोभयानुभवजन्ये तदुभयस्मृतिनाश्यसंस्कारेप
टत्वप्रकारकस्मृतिनाश्यतावच्छेदकजात्या सांकर्यान्न च तत्रोभयगोचरस्मृतिनाश्यतावच्छेदकं वैजात्यांतरं प्रत्येकस्मृतिप्रयोज्यजातिविरुद्धमेव स्वीकार्यमि
तिवाच्यं तथा सत्यनंतजातिवदाश्रयकल्पनमनंतनाश्यनाशकभावकल्पनां चापेक्ष्य संस्कारस्य सविषयकत्वकल्पनाया एव लाघवेनोचितत्वादित्याहुः
ननु तत्सक्षकत्वेऽप्युक्तहेतुसाध्यकानुमितित्वं विशिष्येव लक्ष्यतावच्छेदकं वाच्यमत आह देवादिति सामग्रीवशादित्यर्थः तथा च वह्निव्याप्यधूमोऽयं
पर्वतश्च वह्निमान् इत्याकारानुमितिव्याप्तिरिति भावः ज्ञानवृत्ति ज्ञानसमवेतत्वं तेन साक्षात्कारत्वादेः कालिकसंबंधेन तादृशज्ञानवृत्तित्वेपि प्रसक्तादीना
तिव्याप्तिः अनुभवत्वव्याप्येति अनुभवत्वव्यापकेत्यर्थः तेनानुभवत्वस्यापि स्वव्याप्यत्वात् तदादाय प्रत्यक्षादौ नातिप्रसंगः व्याप्यत्वं भेदगर्भं अनुभव
त्वान्यत्वरूपं भिन्नपिकश्चित् यत्किंचिदनुभवावृत्तित्वेनापि जाते विशेषणत्वमित्यन्ये जातिपदं समवायेनेह इतरभेदानुमितौ हेतुत्वमात्रलाभाय नोतोऽस्य
दादौ व्यभिचारः अनुभवत्वव्याप्यैतत्सर्वपदस्मृतेः स्मृतिज्ञानत्वस्यैवानुभवत्वमिति तद्व्याप्यं तादृशज्ञानत्वमादायाति व्याप्तिः स्यादतो जातिपदमखण्डधर्मा
र्थकमित्यपि वदंति अथानुभवत्वव्याप्यजातेर्निर्विशेषत्वलोभ चरमज्ञानपदव्यर्थमव्यावर्तकत्वादत आह एतदिति तथा च नव्यात ज्ञानपदार्थप्रवेश इति

भावः पृथक् अन्वयव्याप्त्यादिना न क्षतिः नाव्याप्तिः अनुमितित्वमादाय सर्वत्रैव लक्षणसत्त्वादिति भावः अनुभवत्वव्याप्यतामनिवेश्य सूलक्षण
जन्यमद्दश्यजन्यतावच्छेदक विशिष्टपरतया तदनुसारि लक्षणमाह पर्वत वह्निव्याप्येति अत्रावच्छेदकत्वस्य व्यासज्यवृत्तित्वमते कार्यतावच्छे
३३ दकत्वं तत्कोटिनिविष्टतामात्रेणावाच्यं अन्यथानुमितित्वस्यापि तादृशकार्यतावच्छेदकसुपर्याप्त्यधिकरणत्वादसंभवापत्तेः तथाच वह्न्यनुमि
तित्वेन जन्यतायां वह्नित्वस्यापि प्रवेशात् तदादायातिव्याप्तिरत उक्तं ज्ञानत्वानीति ज्ञानसमग्रेनेतितदर्थः तेनवह्निसादेरपि कालिकसंबंधे
नज्ञानवृत्तित्वेपि नोक्तदोषः वरमज्ञानपदस्यैतल्लाभार्थमेव मणिकृतोक्तत्वादिति भावः नतादृशजातिमत् ज्ञानत्वमेव वक्तुमु
चितं ज्ञानत्वेनैवप्रवेशे गौरवादिति वाच्यं तादृशजातिमत् ज्ञानवृत्तितादृशजातिमद्विशिष्टज्ञानत्वं तथा च तस्य लक्षणत्वे सामानाधिक
रण्यात्मक वैशिष्ट्यस्य हेतुतावच्छेदक इतरभेदानुमानविधया ज्ञानत्वत्वस्य प्रवेशे विपरीत गौरवमेव स्यादिति भावः ननु धूमपरामर्श
त्वीयानुमितित्वेन तादृशपरामर्शनाशकानुमितित्वेन तादृशपरामर्शजन्यत्वे तादृशपरामर्शघटकतया ज्ञानत्वस्यापि प्रवेशात्तदा
दाय ज्ञानमात्रेतिव्याप्तिरत आह सामानाधिकरण्येनवेतिविशेष्यविधयावच्छेदकेऽर्थः तेनज्ञानत्वस्यापि तादृशजन्यतासा
मानाधिकरण्येपि नोक्तदोषः वस्तुतस्त्वकार्यतावच्छेदकत्वस्य व्यासज्यवृत्तित्वे पासिद्धान्तः अन्यथा कार्यतावच्छेदक धर्मस्य विशे
ष्यविशेषणभावभेदान्नानात्वमसंजनं शास्त्रकृतविरुध्येत तथाचवह्न्यनुमितित्वेन जन्यतायामनुमितित्वमेव तज्जन्यतावच्छेदक वह्नि
त्वादिकं तु तादृशजन्यतावच्छेदकतायामवच्छेदमतो नोक्तक्रमेण ज्ञानत्वानि पदस्य व्यावृत्तिरुचिता किंतु वह्नित्वावच्छिन्नविधेयकानु ३३
मितित्वमेव विनिगमनाविरहात् स्वावच्छिन्नविधेयताकत्वसंबंधेनानुमितित्वानि वह्नित्वस्यापि परामर्शजन्यतावच्छेदकत्वात् तादृशवह्नि
त्वमादाय वह्नावतिव्याप्तिवारणार्थमेव ज्ञानत्वानि पदं समवायसंबंधेनैव जन्यतावच्छेदकविवक्षयापि वह्नित्वादेर्वारणसंभवात् ज्ञान
त्वानि प्रवेशे गौरवमित्याशयादेवचसामानाधिकरण्येनवेति कस्यान्तरमित्युक्तं मूलस्याभः यद्यपि पर्वतवह्निव्याप्योभयवैशिष्ट्या

वगाहि निश्चयोत्तरं ज्ञानत्वावच्छिन्नं प्रसेव लाघवात्तादृशवैशिष्ट्यावगाहित्वनिश्चयत्वेन हेतुत्वे पर्वतधर्मिकवह्न्यनुमितित्वादिकार्यतावच्छेदकको
ट्यप्रविष्टत्वात् अनुमितिमात्र एवोक्तलक्षणस्यासंभवः तथापि तत्तदप्रामाण्यज्ञानानास्कंदिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेन
वानुमितिहेतुत्वं वाच्यं अन्यथाप्रमत्वेन गृह्यमाणादपि परामर्शादनुमितिप्रसंगात् नच परामर्शधर्मिकं तत्तदप्रामाण्यज्ञानस्यापि स्वा
तंत्र्येणैवानुमितिहेतुत्वं अतो नोक्तदोषः गृहीताप्रामाण्यकस्यैव परामर्शस्योत्तरपरामर्शात्तदोत्पादे स्वपनुमिसनुससापत्तेः एवंच पर्व
तवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वमात्रस्य तादृशनिश्चयजन्यतावच्छेदकत्वे गृहीताप्रामाण्यक पर्वतवह्निव्याप्योभयवै
शिष्ट्यावगाहि निश्चयोत्तरं स्वसामग्रीवशाज्ज्ञायमानायां पर्वते द्रव्यत्वस्य चत्वरेव वह्निमत्पर्वत एववाद्रव्यत्वादेरनुमितौ पर्वते वह्निवि
धेयकान्वयव्यतिरेकोपधमेन पर्वतेवह्न्यापत्तौ च व्यभिचारः स्यात् इसवश्यं पर्वतवह्निव्याप्योभय वैशिष्ट्यावगाहिनिश्चयोत्तर पर्वतधर्मिक
वह्निविधेयकानुमितित्वावच्छिन्नं प्रसेव तत्तदप्रामाण्यज्ञानानास्कंदिततादृशोभयवैशिष्ट्यावगाहि निश्चयत्वेन हेतुत्वं वाच्यमित्यनु
मितित्वस्यापि कार्यतावच्छेदकेनुप्रवेशान्नासंभवः नचतत्तदप्रामाण्यज्ञानानास्कंदितपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहि
निश्चयोत्तरज्ञानत्वावच्छिन्नं प्रसेवतत्तदप्रामाण्यज्ञानानास्कंदिततादृशावगाहिनिश्चयत्वेन हेतुत्वं वाच्यमतो न व्यभिचारः पर्वतविधे
यिकवह्निविधेयकानुमितित्वापेक्षया गुरुत्वेन तत्तदप्रामाण्यज्ञानाभावकूटस्य तादृशनिश्चयकार्यतावच्छेदककोटिप्रविष्टत्वात् अ
न्यैवदिशात्यिमलक्षणेप्यसंभवो वारणीय इति परे रुपशीलितः पंथाः ननु पर्वतोक्तयुक्त्या व्याप्यपक्षोभयवैशिष्ट्यावगाहि निश्चय
त्वस्य वेचत्वात् तद्रूपत्वेनानुमितावपि न हेतुत्वमतः कल्पान्तरमाह वह्निव्याप्यवदिति वह्निव्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चय
त्वव्याप्यधूमावच्छिन्नकत्वप्रतियोगिकव्याप्यविषयक इति कार्यतावच्छेदिकायाजातिस्तद्वत्त्वमित्यादि लक्षणार्थः तत्रतादृश
व्याप्यत्वप्रवेशेन लघुलक्षणमाह वह्निव्याप्यवदिति नवीनाः वह्निव्याप्यधूमवत्त्वप्रकारत्वान्यप्रकारतानिरूपितपर्वतत्वावच्छिन्न

आ. विशेष्यतावच्छेदकज्ञानत्वावच्छिन्नस्य संबंधः एतेन व्याप्यवत्तानिश्चयत्वघटकदलकृत्यमपेक्ष्य यादृशपक्षवाद्व्याप्यधर्मिकपर्वततानिश्चयत्वेनैव पर्वतो वह्निमानित्यनुमि
तौ हेतुत्वादसंभवोपीत्यपास्तं निश्चयघटकदलकृत्यस्याप्रवेशादिति ध्येयं व्याप्तिज्ञानत्वावच्छिन्नकारणत्वप्रवेशोऽसंभवः अनुमितिमात्रे ज्ञानत्वेन
३८ वह्न्याद्यनुमितौ वह्न्यादिज्ञानत्वेनैव हेतुत्वस्य स्वयं वक्ष्यमाणत्वादतस्तत्परित्यागः यद्यपि वह्न्याद्यनुमितौ वह्न्यादिव्याप्यवत्तानिश्चयत्वेनैव
समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या हेतुत्वमुचितं पर्वते चत्वरत्वावच्छिन्नानुमितिसाधारण्यात् तत्तदात्मव्यक्तीनामपि कुचित्पक्षतया परेषां विषय
विधयैव स्वरूपतः तत्पुरुषीयत्वस्यावच्छेदककोटिप्रवेशेपि गौरवानवकाशात् न च पर्वतत्वाद्यवच्छेदेन साध्यवत्तानुमितौ तदवच्छेदेन वह्निव्या
प्यवत्तानिश्चयत्वेन हेतुत्वे आवश्यके उक्तक्रमेण हेतुतायां तदनिर्वाहादिति वाच्यं तावता पक्षतावच्छेदकसामानाधिकरण्येनानुमितौ समानवि
शेष्यतावच्छेदकत्वप्रत्यासत्त्या परामर्शस्य हेतुतायां बाधकाभावात् साध्यतव्याप्यवत्तानतिरिक्ते इति च विशिष्यपक्षतावच्छेदकताघटकसंसर्गावच्छि
न्नस्य विशेष्यतावच्छेदकत्वस्य प्रत्यासत्तित्वे पक्षतावच्छेदकधर्मावच्छेदेनानुमितावपि उक्तक्रमेण परंतु तासंभवात् वस्तुतः पक्षतावच्छेदकावच्छेदेनानुमि
तौ न तदवच्छेदेन हेतुतानिश्चयः कारणं किंतु तदवच्छेदेन बाधाद्यनिश्चय एवेति एतेन पर्वतत्वावच्छेदेन प्रमेयत्वाद्यनुमितिः प्रमेयत्वाद्यनतिरिक्त
नियतवगाहने भ्रमत्वापत्तिरित्यपि केचित् तावता वह्न्यादिसाध्यकानुमितौ समानविशेष्यतावच्छेदकताप्रत्यासत्त्या परामर्शस्य हेतुत्वं बाधकाप्रा
नेः तत्पुरुषीयसाध्यव्याप्यस्य धूमालोकादेरननुगमात् तादृशैक्यव्याप्यवत्तानिश्चयत्वेन हेतुत्वे हेतुत्वे वन्यालिंगकायां पर्वतधूमस्य चत्वरत्वालोकस्य समर्थनेन
न परामर्शो ... साध्यस्यानुमितौ व्यभिचारः स्यात् तत्पक्षीभूतस्य पर्वतादेरपि विशेष्यतावच्छेदककोटावनुप्रवेशः यदि च तत्पुरुषीयवह्निव्याप्य
वत्तानिश्चयत्वेन हेतुत्वं तत्पुरुषीयवह्न्यनुमितित्वेन च कार्यत्वं अत्र च कारणस्य विशेष्यतावच्छेदकत्वमेव संबंधः कार्यस्य तु तत्पुरुषीयज्ञानीयवह्निव्याप्य ३८
मत्त्वानिश्चयत्वनिरूपितविशेष्यतावच्छेदकत्वविशिष्टमेव विशेष्यतावच्छेदकत्वसंबंधः तादृशविशेष्यतावच्छेदकत्वे ... स्वनिरूपकज्ञानोत्तरज्ञानीय
त्वसामानाधिकरण्योभयसंबंधेन ग्राह्यमित्युच्यते तदा समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्यापि परामर्शानुमित्योः कार्यकारणभावः संभवत्येव परंतु तस्

विषयतायाः ज्ञानसमानकालत्वया विनश्यदवस्थपरामर्शेण जनितायामनुमितौ विशेष्यतावच्छेदकीभूतपर्वतादौ तदानीं तादृशपरामर्शविशेष्यतावच्छेदकत्वास
त्त्वेनैव तदनुपेक्षितमस्माभिरिति ध्येयं व्याप्तिविशिष्टवैशिष्ट्यबुद्धावतिव्याप्तिवारणाय व्याप्तिविषयकेति न च व्याप्यविशिष्टवैशिष्ट्यावगाहितामात्रस्येव
जन्यतावच्छेदकतया परामर्शजन्यतावच्छेदकजातिविरहादेव न तत्रातिप्रसंगः तथापि विशिष्टस्मरणाहस्य परामर्शजन्यतावच्छेदकतया तद्भिन्नत्वं रणेतिव्याप्ति
कारणार्थं व्याप्यविषयकत्वनिवेशस्यावश्यकत्वात् वह्न्याद्यापन्नावापत्तिहेतुजातिमादायातिव्याप्तिवारकं तदित्यपि केचित् ननु यत्र व्याप्यविशिष्टवैशि
ष्ट्यबुद्धौ धूमत्ववह्नित्वादिना व्याप्यगुणादिकमवभासते तस्याखंडव्याप्यविषयकत्वान्नजातिव्याप्तिरतो लाघवमाह व्याप्तिप्रकारकेति तादृशानुमितिविषयीभूत
घटादिव्याप्यविषयकत्वस्य व्याप्यविशिष्टवैशिष्ट्यबुद्धावपि सत्त्वात् भासमानात् व्याप्तिज्ञाने विषयं भासमानं साध्यतावच्छेदकीभूतं वह्नित्वादिकमपि तदंशेव
घकत्वं वानुमितावस्य भवीत्यत उक्तं तादृशानुमितिविषयं प्रति तथा च तादृशं यद्धूमत्वधूमत्वादिकं तद्विषयकत्वमेव विशिष्यवक्तव्यमिति भावः ननु
वह्निव्याप्यालोकपरामर्शजन्यायां पर्वतो वह्निमानित्यनुमितौ व्यभिचाराद्वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनानुमितिहेतुत्वमित्युक्तलक्षणासंभवः न च
पर्वतधर्मिकवह्निव्याप्यधूमवत्तानिश्चयत्वविशिष्टानुमितित्वावच्छिन्नं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं वैशिष्ट्यं चाव्यवहितोत्तरत्वसंबंधेन तत्र लक्षणसमन्वयः साधारणे ते
... परामर्शस्थलीयानुमितावपि तदपेक्षेति वाच्यं अव्यवहितोत्तरत्वस्य संबंधत्वे मानाभावात् तादृशनिश्चयसामान्याव्यवहितोत्तरत्वात्र
सिद्ध्या तत्परामर्शाव्यवहितोत्तरतत्तद्व्यक्तीनामननुगतानामेव निवेश्यत्वे अनुगतकार्यकारणभावासंभवात् नापि धूमलिंगकपर्वतधर्मिकवह्नि
विधेयकानुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं धूमलिंगकत्वं तु धूमान्यलिंगकान्यत्वं तच्चानुमितित्वव्यापकं तावदनुगतत्वमतानव्यभिचारद्रीनिवा
र्यं तथा सति तावदनुगतानां विशेषणविशेष्यभावभेदादनंतकार्यकारणभावप्रसंगः अनेन धूमत्वेन तत्तदनुमितिव्यक्तित्वावच्छिन्नं प्रति तत्तत्परामर्शव्य
क्तित्वेन हेतुत्वस्यैवोचितत्वादित्यतः स्वयं लक्षणमाह यां कांचिदित्यादिना न च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन कारणतायाः संस्कारान्यतादृशनि
श्चयनाशक विशिष्टानुमितित्वमेव कार्यतावच्छेदकमित्युक्तलक्षणमेव सम्यगिति धूमपरामर्शगोचरकामिनीजिज्ञासामंतरोत्पन्नतादृशपरामर्शे

स्याविनाशदशायां तु साध्यानुमितेरसंग्रहापत्तेः कामिनीजिज्ञासायाः प्रतिबन्धकत्वेन इष्टसाधनतादिज्ञानविरहेणाच तादृशपरामर्शे स्थितेऽपि पक्षतासंस्कारविनिरस्य
श्री. धूमेनालोकसाधने स्वसमानविषयकत्वात् एवं लिङ्गात्मकधूमपरामर्शानन्तरोत्पन्नेनापि स्वाव्याप्यालोकपरामर्शेण जनितायामनुमितौ व्यभिचारात् ज्ञानादिनाशं
प्रति लाघवेन स्वोत्तरोत्पन्नत्वेनैव जनकता धूमपरामर्शोत्तरजातसंयोगादेरपि तन्नाशकतया तद्दशायां शब्दालोकलिङ्गकानुमितावपि व्यभिचाराच्च अत एव
३५ धूमपरामर्शेन [illegible] अनुमितित्वावच्छिन्नं प्रत्येव वह्निव्याप्यधूमवत्तानिश्चयत्वेन हेतुत्वं न च विनश्यदवस्थधूमपरामर्शजन्यानुमित्यसंग्रहः तत्र विशेषणवत्ता
परामर्शजन्यानां कार्यकारणभावस्वीकारात् तदतिरिक्तस्थल एव [illegible] अनुगतरूपेण हेतुत्वसंभवाच्च न च विनश्यदवस्थपरामर्शजन्यानुमितिदशायामपि
परामर्शनाशकानुमित्यापत्तिः सामग्रीसत्त्वादिति वाच्यं कार्यसहभावेनैव धूमपरामर्शनाशकानुमितिधूमपरामर्शयोर्हेतुहेतुमद्भावादिति विनिर
[illegible] धूमपरामर्शव्यधिकरणानुमित्यापत्तिर्नामापि तत्र [illegible] तादृशपरामर्शनाशकतया तत्रैव व्यभिचारादिति नव्यास्तु वह्निव्याप्यधूमवत्पर्वतनि
श्चयविशिष्टानुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं वैशिष्ट्यं चात्र स्वसामानाधिकरण्यस्वध्वंसप्रागभावप्रतियोगित्वोभयसम्बन्धेन ग्राह्यं इति निर
विकल्पविशिष्टिनिवेशयतां नो लक्षणस्यासम्भवः न च विनश्यदवस्थपरामर्शजन्यानुमित्यसंग्रहः तदनुमितौ परामर्शकालीनविशिष्ट्य हेतुतावतरस्य
[illegible] वस्तुतस्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयविशिष्टकृतिमदनुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं वाच्यं तेन विनश्यदवस्थपरामर्शकालीना
नुमितेर्नासंग्रहः अत्र च निश्चयवैशिष्ट्यं पूर्ववत् स्वसामानाधिकरण्य इति प्रागभावप्रतियोगित्वोभयसम्बन्धेन निवेश्य तादृशकृतिमत्त्वं स्वस
मानाधिकरण्यसम्बन्धेनाख्यं अतो न कोऽपि दोषः सर्वत्र जीवनयोनिमतमादाय कार्यतावच्छेदकत्वापत्तेः न च यत्र धूमपरामर्शोत्तरं तत्कालिकाप्रामा
ण्यग्रहात्मकालोकपरामर्शोत्पादः तादृशापां बाधादिनिश्चयस्य ध्वंसः तदुत्तरं वह्न्यनुमितेरपि निरुक्तकृतिमदनुमितित्वात् [illegible] प्रामाण्य ३५
ज्ञानाभावविशिष्टधूमपरामर्शस्यासत्त्वाद्व्यभिचार इति वाच्यं अप्रामाण्यज्ञानव्यक्तीनामपि विशेषतया वोत्तेजकतया [illegible]
[illegible] एवं च परामर्शधर्मिकप्रामाण्यज्ञानाभावकूटस्य पक्षत्वात् [illegible] अनुमितिप्रयोजकत्वमते वह्निव्याप्यधूमवत्तानिश्चयविशिष्ट
कृतिमत्त्वावच्छिन्नं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वादनुमितित्वस्य जन्यतावच्छेदकत्वात् जातिघटितलक्षणस्यासंभवस्यादतः स्वयं लक्षणमाह

यं कांचिदिमादिनेति प्राहुः यत्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वपदेन मानसत्वव्याप्यपरामर्शत्वजातिरूपकक्षितेति तदवच्छिन्नकारणत्वमंतर्भा [illegible]
क्षणासंभवः प्रागननुभूततत्साध्यादिपरामर्शादप्यनुमित्युत्पत्तेः परामर्शत्वं जातिर्न स्मृतित्वव्याप्यता शंकापीति मतं तत्तुच्छं निश्चयत्वं तेन परामर्शत्वजा
तुपलभ्यव्याप्त्यविषयकं वर्तीसस्य ज्ञानत्वनिरिसादेश्च व्यर्थतापत्तेः न वा परामर्शत्वस्य जातित्वे प्रमाणमस्ति तदन्यायेनोपाधि [illegible] प्रत्यक्षादिजनकता
[illegible] हेतुत्वसंभवात् तादृशजातौ मानाभावः घटादावरणपदं दण्डादेरिव अनुमितौ ज्ञानमात्रस्य स्वरूपयोग्यत्वेऽपि धातिविरहात् किं वानुमितित्वा
मान्ये परामर्शत्वजातेर्हेतुत्वस्वीकारेऽपि वह्न्यनुमितित्वावच्छिन्नं प्रत्यनुगतनियामकाभावः वह्निविषयकपरामर्शत्वेन हेतुत्वे वह्निविषयकात् घटादिसाधकप
रामर्शादपि वह्न्यनुमितिप्रसंगः न च पर्वतधर्मिकवह्न्यनुमितित्वस्य कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्योत्पत्तावा परकभावः तादृशानुमितित्वस्यापि
परामर्शधर्मिकप्रामाण्यज्ञानाभावस्य पक्षताविशेषस्य वा कार्यतावच्छेदकत्वेन तदवच्छिन्नस्योत्पत्तिसंभवादिति इदं चावधातव्यं पर्वतधर्मिकवह्न्यनुमि
तित्वावच्छिन्नं प्रति जनकतावच्छेदकतया धूमालोकादिनानाहेतुकवह्निपरामर्शसाधारणी विषयत्वज्ञानात्मकं वा व्याप्यवत्तानिश्चयत्वमात्रमानसत्वव्याप्यपराम
र्शत्वजातिः कदाचित् कल्प्यापितुं शक्यत एव यदि चाक्षुषादिपरामर्शात् तत्क्षणविलम्बेनैवानुमितिः द्रव्यत्ववह्न्योः साध्ययोः समूहालम्बनपरामर्शात् द्रव्य
त्ववह्न्योर्नानुमितिः किन्तु प्रत्येकस्यैव परामर्शात् अन्यथा तदुभयजनकतावच्छेदकजात्यां तत्रैव संकरापत्तेः एतेन धूमालोकलिङ्गकवह्न्यादिकमेव धूमादि
परामर्शजन्यतावच्छेदकं तत्त्वानुमितित्वव्याप्यैव जात्यनुमितिरपि च तं व्याख्यातमिति दिक् केचित्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनैव हेतुत्वे जन्यतानुता
दृशधूमविशिष्टपर्वतधर्मिकवह्न्यनुमितित्वेन न च धूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेन लाघवादस्तु जन्यतेति वाच्यं नानाविधधर्मिकानुमितित्वरूप
योगितया जनकज्ञानविषयजनकज्ञानविषयीभूतव्याप्तीनां विशिष्यानुमितौ कार्यतावच्छेदकत्वात् एकविधव्याप्तेरेवानुमितिप्रयोजकत्वे तु धूमवत्पर्व
तत्वावच्छिन्नधर्मिकवह्न्यनुमितित्वेनैव जन्यत्वं वक्तव्यं किं गोपधानस्यावार्यसमतत्वेन तस्यैव परामर्शजन्यतावच्छेदकत्वौचित्यात् तथा च धूमालोकदाणमे
वसम्यक् न चानुमितिमात्रस्य पक्षे हेतुत्वगाहित्वे यत्र बाधादिकालीनपरामर्शोत्तरपक्षे हेतुभावाच्च दोषतत्कालिकं वा पक्षत्वे तत्रानुमितिर्न स्यादिति वाच्यं इ
ष्टत्वात् न चैवं सति तत्र धर्मिज्ञानप्रसङ्गस्यादुत्पादसाक्षात्कारं प्रत्यनुमितिसामग्र्याः विरोधितायां सिद्ध्यभाववत्पक्षधर्मिके तत्तादात्म्यनिश्चयाभा
भावस्यापि प्रवेशगौरवं स्यादिति वाच्यं मणिकृन्मतेऽपि यत्र सिषाधयिषाभावज्ञानात्मकस्यैव परामर्शस्योत्तरं पक्षत्वाभावस्यानिश्चयात् तदुत्तरम्

श्री. मितेरुत्पत्त्यै । सिद्धेरनुमितिविरोधित्वेन तत्प्रामाण्यज्ञानाभावस्य प्रवेशे गौरवमस्तु, स्यहात् अस्माकं मते हेत्वाभावनिश्चयनप्रतिबंधात्तत्रानुमितेरनुत्पत्तेः
सिद्धेर्विरोधितायां तत्प्रामाण्यज्ञानाभावस्याप्रविष्टत्वात् यत्तु लिंगोपधानमतपक्षेऽनुमितिमात्रस्यैव विशिष्टवैशिष्ट्यबुद्धित्वेन तन्निष्ठसाध्यवत्ता
२६ वत्तापरामर्शजन्यत्वं वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयताकत्वेनैवावच्छिन्नो तादृशप्रत्यक्षसाधारण्येन [illegible] नतु वह्निव्याप्यधूमवत्पर्वतत्वधर्मिकत्वेन प्रत्यनु
मितित्वेन कार्यकारणभावांतरकल्पनागौरवादिति कुतः परामर्शजन्यतावच्छेदकीभूतमनुमितित्वमादाय प्रागुक्तलक्षणासंभवः न चैतन्न साध्यकानुमिति
त्वस्य परामर्शजन्यतावच्छेदकत्वे वह्निव्याप्यविशिष्टपर्वतवत्केरनुमितिरथाप्याघटादेरन्वितादृशपर्वतेनुमित्यापत्तिः पर्वतधर्मिकानुमितित्वस्यापि घटसा
वायसंबंधावच्छिन्न ज्ञानवन्निष्ठाभाव प्रतियोगितानवच्छेदक प्रतियोगिताकस्यात्मत्वाद्यभावस्यैव प्रतियोग्यसमानाधिकरणत्वात् अत्र साध्यवन्निष्ठाभाव:
प्रतियोगि व्यधिकरणा [illegible] विशेषणीय: तेन साध्य[illegible]मात्र एव समवायित्वाद्यवच्छिन्न[illegible] घटाद्यभावस्य प्रतियोगिता घटाभावस्य सत्त्वेपि न साध्यवन्निष्ठा
भावप्रतियोगितानवच्छेदक प्रतियोगिताकाभावस्याप्रसिद्धि: [illegible] संबंधेन स्वावच्छिन्नानधिकरण साध्यवन्निष्ठाभाव प्रतियोगितावच्छेदकोयो

स्त५ धर्म: [illegible] तत्संबंधावच्छिन्नाधेयता[illegible] स्वरूपत्वसंबंधेन साध्यव्यापकतावच्छेदकत्वं निरूक्त तादृशव्यापकतावच्छेदिका यदभावीया प्रति
योगिता तादृशाभाव: प्रवेशनीया: न च तत्संबंधावच्छिन्नाधेयत्वसादि[illegible] [illegible]प्रतियोगिता[illegible] संयोगादि संबंधेन[illegible]
दिव्यापकतावच्छेदकत्वापत्त्या यावदंतर्गत[illegible] संबंधेन द्रव्यत्वाद्यभावस्य साध्यव्यापकता[illegible] संयोगसंबंधेन प्रतियोगिसामानाधिक
रण्यात्प्रसिद्ध्यात्[illegible]मात्र एवासंभवस्य वारणार्थं तदुपादानात् संयोग[illegible]संबंधावच्छिन्नाधेयत्वस्य[illegible] सत्तेन द्रव्यत्व[illegible] प्रतियोगिसस्य
तादृशाधेयत्वानवच्छेदकत्वात् तत्संबंधेन स्वावच्छिन्नानधिकरणत्वं च तत्संबंधेन स्वावच्छिन्नाधिकरणत्वासामान्यभेद: तेन वृत्त्यादि[illegible] प्रति

५१ योगितावच्छिन्नाधिकरणागगनोभयभेदस्य घटत्वादिनावच्छिन्नादिनिष्ठप्रतियोगितावच्छिन्नाधिकरणाभेदस्य च वह्न्यादिसाध्यवति सत्त्वेपि न क्षतिः अत्र आ
धाराधेयस्वरूपकथनं वस्तुतः साध्यवन्निष्ठाभावस्य तत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वमेव तत्संबंधेन साध्य
व्यापकतावच्छेदकसंबंधेन सामानाधिकरण्योपपादनाय अधिकरणधर्मावच्छिन्नाभावमादाय नाव्याप्तिः तत्र साध्यवन्निष्ठत्वस्य अभावस्य स्वरूपसंबंधे
नप्रतिः तेन संयोगेन कालत्वादिमादौ स्पंदत्वाभावस्य कालिकसंबंधेन साध्यवन्निष्ठत्वावदंतर्गतत्वात् वाच्यत्वाभावस्य तादृशस्य प्रतियो
५२ गिसामानाधिकरण्यसत्त्वेपि नातिव्याप्तिः एवं च जातिसामान्याभावादेरपि वह्न्यादिव्यापकतया तत्प्रतियोगितावच्छेदकत्वं ज्ञानत्वादिरूपस्य
तु समानाधिकरणाभावस्य जातिसामान्याभावाद्यात्मकप्रतियोग्यसमानाधिकरणत्वादसंभवापत्तेः रतोभावान्तरेषु अभावभिन्नाद्
ति चेत् तदर्थः यथा च सामानाधिकरण्येनानवच्छेदकत्वघटिततया न दोषस्तथा अग्रे प्रपंचयिष्यते नव्यास्तु साध्यतावच्छेदकेत्यादि साध्य
तावच्छेदकावच्छिन्नाधिकरणानि यावंति तन्निष्ठाभावनिरूपितप्रतियोगिताकेत्यर्थः न चैवं मात्रव्याप्तिः साध्यकसद्धेतावव्याप्तिः तत्र यावत्त्वस्याननुगतत्वात्
शब्दैकत्वस्य किंचित्करत्वात् यत्र साध्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावावच्छिन्नधर्मास्तत्सत्वे समानाधिकरण्याद्व्याप्तिप्रतियोगिताक
त्वर्थं इति प्राञ्चः यत्तु साध्यवद्वृत्ति अभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वर्थं इति तन्न केवलान्वयि साध्यकसद्धेतौ ताद
शप्रतियोगिताप्रसिद्ध्या व्याप्तेर्गगनस्वरूपाभावस्य तादृशत्वेपि हेतुसमानाधिकरणत्वासंभवादिति अत्र व्यापकतावच्छेदकप्रतियोगितावच्छेदकत्व
व्यापकताया अवच्छेदप्रतियति बहुव्रीहिः प्रत्ययः तेन प्रतियोगितया असमं अवच्छेदकपदस्य कोपधत्वेपि पुंवद्भावः नहि तत्र व्यापकस्य
वृत्तिपदस्य सत्त्वे पुनः सर्वत्रेति सद्धेतावसद्धेतौ चेत्यर्थः तथा च यावत्सामान्यावृत्तिव्याप्तिरेव स्यात् नाव्याप्तिरिति भावः सकलव्याप्तिवापिणीत्य
र्थः इदमेके चिन्त्यं सर्वत्रेति सकलहेत्वधिकरणावच्छेदेनेत्यर्थः इत्याहुः वाच्यत्वाभावस्येति घटत्वादिना वाच्यत्वाभावस्येत्यर्थः तथा तादृशप्रति
योगिसमानाधिकरणत्वात् तथा च धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थमेव तत्पदमिति भावः ननु साध्यतावच्छेदकव्यापकप्रतियो

२ वह्निमान्धूमादित्यादौ च समवायादिना वह्निसामान्याभावमादायैव लक्षणसंगतिः २

गिताकयावदभावो तेनैव वाच्यत्वाभावमादायानतिव्याप्तिप्रसंगस्य व्युदासासंभवः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावा
नां यावत्त्वोपादाने गौरवमतस्तत आह अत एवेति निरुक्ताभावानां यावत्त्वोपादानादेवेत्यर्थः अन्यथा हेतुत्वाद्यभावस्य साध्यता
वच्छेदकव्यापकप्रतियोगिताकत्वात् हेतुसत्तवोभयत्वाद्यवच्छिन्नाभावस्य च तादृशप्रतियोगिताकस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रति
योगिसमानाधिकरणत्वादतिव्याप्तिः स्यादिति भावः यत्तु साध्यप्रतियोगिको यत्किंचिदभावः यद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगि
समानाधिकरणस्तद्धर्मवत्त्वमिति केवललक्षणमस्तु कृतं यावत्त्वगर्भनिरुक्त्या धूमवान्वह्नेरित्यादौ घटत्वेन धूमाभावस्य तादृशहेत्वधि
करणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादिति व्याप्त्युदासादित्याशंक्याह अत एवेति आदिकमुदाहरति तत्र तादृशीत्यादि धू
मवान्वह्नेरित्यादिप्रसिद्धस्थले एव वह्निधूमोभयत्वावच्छिन्नाभावमादायातिव्याप्तिसंभवे हेतुसमवायेन तादृशस्य अनुधावनसंदर्भस्य
रोधापत्तेः यद्यपि तादृशाभावप्रतियोगिताव्यापकं साध्यतावच्छेदकं तादृशः कश्चिदभावो यद्धर्मावच्छिन्नाधिकरणावच्छेदेन प्रतियोगि
समानाधिकरणस्तद्धर्मवत्त्वं व्याप्तिरित्युक्तावेव वाच्यत्वाभावमादायातिव्याप्तिवारणसंभवात् यावत्त्वगर्भलक्षणे गौरवमुक्तं अत एवेत्यादि तदप्यसंगतं
प्रतियोगितामात्रस्य व्यासेकपर्यवसिततया वह्निधूमोभयत्वादेः तद्व्यापकत्वासंभवात् वह्निधूमोभयवान् धूमादित्यादौ अव्याप्तिप्रसक्तता
इत्यनिरुक्तेः शंकितुमशक्यत्वात् ननु प्रतियोगिसामानाधिकरण्यघटकं यत्र प्रतियोग्यधिकरणत्वं साध्यवन्निरूपितं साध्यतावच्छेदकसंबंधेन ग्रा
ह्यमित्युक्तं यावत्त्वनिवेशेन सत आह अत एवेत्यादीत्यपि वदंति नव्यास्तु ननु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठप्रतियोगिताक
यत्किंचिदभावः यदधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसमानाधिकरणस्तत्वं नियमस्यैव सम्यक्त्वे यावत्त्वगर्भलक्षणे गौरवमुक्तं प्रमेय
वान्वाच्यत्वादित्यादौ विरुद्धघटत्वप्रमेयोभयं गगनाद्यवच्छिन्नप्रतियोगिताकप्रमेयाभावमादायलक्षणासंभवात् गगनादेर्हेतुमत्त्वलक्षणध
र्मत्वाभावात् सामान्याभावीयप्रतियोगित्वं च स्वरूपसंबंधात्मिका यत्र साध्ये विभिन्नमतोच्यते घटत्वपदं प्रमेयमात्रस्याभावमादायैव धूम
वान्वह्नेरित्यादौ अतिव्याप्तिवारकत्वात् साध्यनिष्ठपदमर्पितं धर्मे च अन्यथा गगनाद्यवच्छिन्नप्रतियोगिताकवाच्यत्वाभावमादायैवाव्यापित्वा
दिस्यादेतिव्याप्त्यापत्तेराह अत एव इत्यादि हेतुमत्त्वविशिष्टमन्तव्यम् धूमाभावस्य साध्यतावच्छेदकातिरिक्तधर्मावच्छेद्यप्रतियोगिताकत्वमतस्य
२ न चानवच्छिन्नत्वं वैयर्थ्यं वह्निधूमोभयत्वावच्छिन्नाभावमादाय धूमवान्वह्नेरित्यादौ घटत्वादिनासत्वाद्यभावमादाय विशिष्टसत्तावान् सत्तादित्यादौ अतिव्या

प्रतियोगि सामानाधिकरण्यं नास्ति व्याप्तिं संपादयतीत्यादरप्येनुद्दिष्टतावच्छिन्नाभावपर्यंतस्य प्रतियोगिसामानाधिकरण्याभिधानमपि स्याधूमेन क्षते यत्तु तत्र
आ कृतसाध्यव्यापकतावच्छेदकप्रतियोगितकोयः कश्चिदभावो यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्समेयाभिव्यभिचारितत्वं केनचिन्नाद्यत्वानुम
भावावच्छिन्नप्रतियोगितावच्छेदकतादृशोभयात्मकसाध्यव्याप्यतावच्छेदकप्रतियोगिताकाभावाद्वतादृशोभयाभावमादायातिव्याप्तिरसंभवश्च
इति विभावनीयमिति प्राहुः केचित्तु ननु साध्यतावच्छेदकावच्छिन्नपदस्य व्यर्थतया साध्यव्यापकतावच्छेदकप्रतियोगितकाभाव एव यावत्त्ववि
शेषणमुचितमित्यत आह अत एवेति अन्याभावे यावत्त्वोपादानादेवेत्यर्थः इति प्राहुः एतच्च आत्माभिन्नत्वे सति विशेषगुणवत्त्वं तच्च न व्यापक
५२ तावः प्रतियोगिवैयधिकरण्याघटितकेवलान्वयित्वं तत्समूर्त्तं तोभियस्य व्यापकं तादृशोभयवति घटादौ द्रव्यत्वनिरूपणावच्छेदेन विशेषगुणाभाव
विच्छिन्नाभावस्यासत्त्वादतउक्तं यत्तेनान्यत्वेति साध्यस्यैवाभावमादाय नातिव्याप्तिः सुतरां वस्तुतस्तु स्थलेति कैमुतिकन्यायेनेति वदंति अभावेत्यादीति स्वविशि
ष्टहेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादित्यर्थः मनस्येव व्यभिचारादित्यर्थ इति भावः ननु यत्समानाधिकरणा यावन्तो भावाः प्रतियो
गिसमानाधिकरणास्तावन्निरूपितस्यैव सम्बन्धे साध्यतावच्छेदकावच्छिन्नेति आधिक्यं व्यर्थं अभावस्य समानाधिकरणधर्मावच्छिन्नत्वस्वकीयप्र
प्रतियोगिताश्रयसामानाधिकरण्य तदन्यप्रतियोगिताकाद एव व्याप्यवृत्तितानिरूपितत्वा धूमाद्यभावस्य पूर्वक्षणवृत्तित्वाविशिष्टस्य
अभावप्रतियोगितावच्छेदकत्वे तथात्वेन धूमवान्वह्नेरित्यादावतिव्याप्त्ययोगात् अत आह साधनेति गोत्वादिसत्त्वादिपदे गगनादिसंग्रहः
तथा च तदुक्तानुक्ताव्यसंभव एव स्यादिति भावः ननु एवं च समानाधिकरणा यावन्तः साध्यप्रतियोगिकाभावाः साध्यतावच्छेद
कसंबंधेन प्रतियोगिसमानाधिकरणास्तत्त्व निरूपिता व्याप्तिः तावत्त्वेव गोत्वाभावमादायासंभवस्यैव्यवधारणादत आह तेनादिति
तथा चोक्तविकल्पाभ्यां द्रव्यत्वाधिकव्याप्तिसाध्यकेसद्धेतौ लक्षणासंभवेपि वह्निमान्धूमादित्यादिमान्तत्वादित्यादौ साध्यप्रतियोगिता
कानां तत्तद्व्यक्तित्वावच्छिन्नानामभावानां च प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरिति भावः नन्वत्र साध्यव्यापकप्रतियो
गिकाद्यस्यैव समावेशे व्यापकतावच्छेदकपर्यंतानुधावनं व्यर्थमिति वाच्यं तत्र साध्यवृत्तीनां गगनादीनां च प्रमेयत्वप्रकारेण साध्य

व्यापकत्वया तद्व्याप्यत्वासंभवापत्तेः हेतुनिष्ठत्वे सति स्वानधिकरणसाध्यवन्निष्ठाभावप्रतियोगित्वे साध्यव्यापकत्वं निरूप्यत्वं प्रतियोगिकाभाव
२ स्या वनिवेशमतामिति चेत् तस्य लक्षणानां नवत्वे प्रयोजकत्वाभावादित्यादि इति भावः यत्समानाधिकरणाधूमत्वहेत्वधिकरणावच्छिन्नेत्यनेन यादृशेन तदधिकरणमिति
तत्संबंधीत्यर्थः तेन तादात्म्येन अधिकरणाप्रसिद्धावपि तत्संबंधेन सद्धेतौ नाव्याप्तिः अतएवापीति प्रतियोग्यधिकरणवृत्तित्वाविरहकमित्यर्थः यत्प्रतियो
ग्रे २ गिसामानाधिकरण्यमवश्यं स्वविशिष्टहेत्वधिकरणावच्छेदेनैव विवक्षणीयं तथा च हेतुतावच्छेदकसंबंधेन हेत्वधिकरणानुक्तौ कालिकसंबंधेन धूमसमानाधिक
रणे महाकाले वह्निमत्त्वस्यान्यत्वाभावस्य यावदन्तर्गतत्वात् स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिः संप्रति तथा च स्वविशिष्टहे
त्वधिकरणत्वाद्युक्तावनुक्तौ धूमवान्वह्नेरित्यादावतिव्याप्तिः वह्निमान्धूमादित्यादौ स्वविशिष्टसाध्यकाभावेत्यस्य साध्येन प्रसिद्ध्योदाहरणापि हि
स्तुतं यत्तु महाकालस्यैव प्रलयान्यत्वाद्यभावाविशिष्टहेत्वधिकरणत्वसंभवात् स्वविशिष्टसत्त्वोपि वह्निमान्धूमादित्यादौ नाव्याप्तिः महाकालस्य हे
तुताघटकसंबंधेन धूमाधिकरणत्वाभावेपि हेतुसंबंधेनापायात् तादात्म्येन हेतोः संग्रहार्थं हेतुतावच्छेदकसंबंधेन यो हेतुसंबंधीत्युक्तिर्यथा
वदाभावमानिवेश्यत्वादितिचिमतं तन्न संयोगमात्रेण धूमहेतोः प्रभागंकुलादौ वह्निव्यभिचारितया पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुतानात्
योगेन च धूमस्याधिकरणपर्वतादौ प्रलयत्वादिस्वरूपस्य प्रलयान्यत्वाद्यभावस्य वैशिष्ट्याप्रसिद्धेरावश्यकत्वात् विभिन्नकालीनविषयतान्यसंबंधसामान्ये
नैवाधाराधेयविरहादिति दिक् ननु पृथिवीत्ववान्महाकालत्वात् महाकालकपालान्यतरत्वादित्यादावतिव्याप्तिः साधनसमानाधिकरणस्य महाकाल ६१
कान्यत्वाद्यभावस्य पृथिवीत्वाधिकरणावच्छेदेन कालिकसंबंधेन प्रतियोगिसमानाधिकरणत्वादत आह एवमिति द्रव्यान्तरेपि प्रतियोगिसामानाधि
धिकरण्यादिकेत्यर्थः एकसंबंधेन ४ हि कालिक + व्यापकसमन्यसंबंधेन प्रतियोगिसामानाधिकरण्यं सिद्धान्तबोधनम्, अन्यत्र तिव्याप्तिरूपेदे
३: साध्यव्यापकतायां घटकसंबंधेन सद्धेतौ प्रतियोगिसामानाधिकरण्यं घटकसंबंधस्यैव व्यावृत्तिपरीनिरसनीयमित्यर्थः यत्संबंधेन स्वा वह्निनाधिकरणत्वात ने
वह्न्यभावप्रतियोगितावच्छेदकं यद्यत्तदन्यप्रतियोगिताकः साध्यवन्निष्ठाभावीयं यत्संबंधावच्छिन्नप्रतियोगितासमानाधिकरणान्यप्रतियोगिताको
भावस्तत्ता तेन संबंधेन प्रतियोगितावच्छेदकाधिकरणं तद्वृत्तित्वं विवक्षितमिति फलितोऽर्थः पृथिवीत्वाभावप्रतियोगितात्तु न कालिकसंबंधेन पृथिवीत्वादि
व्यापकतावच्छेदकनिरूपणे व्यभिचारात् किंतु समवायेनैव तेन च संबंधेन पृथिवीत्वाद्यभावस्य हेत्वधिकरणमहाकालावच्छेदेन प्रतियोगिसामानाधि

ईश्वरस—

करणत्वात् नोक्तातिव्याप्तिरिति भावः यत्तु येन संबंधेन व्यापकत्वं तेन संबंधेन प्रतियोगिसामानाधिकरण्याभावोऽपि निसत्त्वानं निसत्त्वविषयकत्वात् इत्य
त्रातिव्याप्तिः साधनसमानाधिकरणस्य ज्ञानत्वाद्यभावस्यापि साध्यव्यापकताघटकविषयतासंबंधेन यावद्वृत्त्यधिकरणे प्रतियोगिसमानाधिकरणत्वात्
न च येन येन संबंधेन व्यापकत्वं तेन तेन संबंधेन प्रतियोगिसमानाधिकरण्यविवक्षणान्नोक्तदोषः तथा सति यावद्वैयर्थ्यापत्तेः विशेषणताविशेषोभान्येनैव तद्व्यावर्त्तनरूपितविशेषणतयापि वाच्यत्वादिः साध्यव्यापकतया घटत्वादिना वाच्यत्वाद्यभावस्यैव तादृशसंबंधेन हेत्वधिकरणा
वच्छेदेन प्रतियोगिसामानाधिकरण्यविरहात् धूमवान् वह्नेः इत्यादि व्यभिचारिण्यतिव्याप्तिविरहादिति तन्न विषयतासंबंधेन व्यापकतापत्वात्
त्वात् विषयतासंबंधेन स्वावच्छिन्नाधिकरणाप्रसिद्ध्या स्वावच्छिन्नाधिकरणसाध्यवृत्तित्वसादि व्यापकतायां तेन संबंधेनासंभवात् न च तेन संबंधेन
स्वावच्छिन्नासंबंधित्वमेव व्यापकतायां निवेशनीयं उक्तातिप्रसंगभयेनैव तस्यानिवेशनीयत्वात् न च तत्संबंधावच्छिन्नायां साध्यवन्निष्ठाभावप्रति
योगितायाः सामानाधिकरण्येनानवच्छेदकधर्मवत्त्वलक्षणव्यापकत्वं विषयितासंबंधेन सुलभं साध्यवति निःसत्त्वानं वस्तुमात्रस्यैव विषयितासं
बंधेन सत्त्वेऽपि निःसत्त्वानान्यत्वविशिष्टघटस्य विषयितासंबंधेनाभाववत्त्वमानस्य तत्र सत्त्वे बाधकाभावादिति वाच्यं विषयितायाः इत्यनियामकत
यात्तत्संबंधावच्छिन्नप्रतियोगिताप्रसिद्धेः यदपि मनस्त्ववद्द्रव्यत्वादिसत्रातिव्याप्तिः अण्डत्वसमानाधिकरणस्य मनस्त्वाद्यभावस्य साध्य
व्यापकताघटकदैशिकविशेषणतया सर्वत्रैव परमाणौ प्रतियोगिसमानाधिकरणत्वादिति तदपि तुच्छं निःसत्त्वानाम व्यावर्त्तकत्वात् अन्यानामे वाभूत्वा
नां दिगुपाधितया परमाण्वादिकृतविशेषणतया कुत्राप्यसत्त्वात् तेन संबंधेन साध्यव्यापकत्वविरहात् अन्यथा वस्तुमात्रस्यैव कालोपाधित्वसंभवात् तदपि तु
न्यमात्रस्य कृत्वात् अत एव प्रलये दृष्टा दिक्त्वविभागो नास्तीत्यपि सिद्धान्तः संगच्छते अन्यथा परमाणौ सत्त्वात् तदानीमपि दिग्विभागप्रसंगादित्याह
कः यदि च स्पंदः कालत्वादिसाध्यवति व्याप्तिः साधनसमानाधिकरणमहाकालान्यत्वाद्यभावस्यापि साध्यव्यापकताघटककालिकसंबंधेनम
हाकाले प्रतियोगिसमानाधिकरणत्वात् न च स्पंदत्वसाध्यकोऽयं जन्ययत्किंचिद्धेतुधर्म्मकः विषयितासंबंधेनैव स्पंदत्वव्यापकत्वात् यावदन्तर्गततदभा
वस्यैव व्यापकताघटकविषयतासंबंधेन हेत्वधिकरणे महाकाले प्रतियोगिसमानाधिकरण्याभावान्नातिव्याप्तिः नहि तादृशबोधव्यक्तेः कालिक

संबंधेनाधिस्पंदत्वव्यापकत्वं अवभासमानस्पंदे व्यभिचारादिति वाच्यं विषयितायाः ज्ञानसमानकालीनतया ज्ञानवृत्तिरुच्यतया भावदशायामेव स्पंदत्ववृत्तिविषयतासं
बंधेन तद्धेतुरूपाभावसत्त्वात् विषयितासंबंधेनायं स्पंद इत्याकारकजन्यवृत्तेः साध्यव्यापकत्वासंभवात् किंचाधिकरणधर्मावच्छिन्नाभावस्यासत्त्वेऽपि व्यधिकर
णसंबंधावच्छिन्नवाच्यत्वाभावमादायैव केवलान्वयिसाध्यके लक्षणासंभवात् प्रतियोग्यवृत्तिश्चेति मूलस्य दूषकत्वानुपपत्तिः न च साध्यवन्निष्ठाभावप्र
यप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकेत्वरूपव्यापकतायां व्यधिकरणधर्मावच्छिन्नाभावमादायासंभववारकस्य सामानाधिकरण्ययोन
स्य सार्थक्यायामेव तन्मूलग्रंथस्य तात्पर्यमिति वाच्यं सामान्यधर्मेणाविच्छिन्नाभावमादाय व्यापकत्वाप्रसिद्धेर्वारणार्थमेव सामानाधिकरण्यदल
स्य व्यापकतायामवश्यं निवेशनीयत्वात् इत्यादिकं विभाव्यते तद्धा संबंधेन विवक्षयेति ग्रंथस्य साध्यव्यापकत्वतदवच्छेदकप्रतियोगित्वस्य प्रति
योगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वस्य चैकसंबंधावच्छिन्नविवक्षयेत्यर्थः तथा च स्वप्रतियोगितावच्छेदकसंबंधावच्छि
न्नसाध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्त अभावाः प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभात्
यावदन्तर्गतस्य समवायादिसंबंधेन निःसत्त्वानत्वमनस्त्वस्पंदत्वाद्यभावस्य स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंबंधेन यावद्धेत्वधिकरणे प्र
तियोग्यसमानाधिकरणत्वात् निःसत्त्वानं निःसत्त्वविषयकत्वात् मनस्त्ववद्द्रव्यत्वात् स्पंदो महाकालत्वात् इत्यादौ कुत्रापि नातिव्याप्तिः न चेदं वाच्यत्वहेतु
त्वादिसाध्ये अव्याप्तिः व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्य तत्रघटकतया तस्य प्रतियोगितावच्छेदकसंबंधसमानाभावादिति वाच्यं
स्वरूपसंबंधेन घटत्वादिना वाच्यत्वं नास्तीत्यादिप्रतीत्यनुरोधेन तादृशाभावस्यापि प्रतियोगितावच्छेदकसंबंधस्वीकारात् अन्यथा भूतले संयोगेन पटत्व
वच्छिन्नघटवदिति निषेधप्रसंगे भूतले संयोगेन पटत्वेन घटो नास्तीति प्रसक्तप्रसंगात् न चैवमप्रसिद्धिः व्यधिकरणधर्मावच्छिन्नोऽपि चेदभावप्रामाणि
कत्वे सर्वैः संबंधैः स्वप्रतियोगिता अवच्छिद्यतामिति ग्रंथकृतैव सामान्याभावे वक्ष्यमाणत्वात् केचित्तु संबंधैक्यविवक्षयेत्यस्य साध्यत्वं साध्यव्या
पकत्वं प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वं चैव न साध्यतावच्छेदकसंबंधेनाविवक्षणीयमित्यर्थः तथा च साध्यता
वच्छेदकसंबंधावच्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसंबंधावच्छिन्नप्रतियोगिताका यावन्तो अभावाः साध्यतावच्छेदकसंबंधेन प्रतियो

प्रांत मो गिलं २

घटाभिन्नद्रव्यत्वान् साध्ये

६ स्वामित्वसंबंधेनेत्यर्थः ८

गिसमानाधिकरणादित्यर्थलाभान्न कुत्रापि अतिव्याप्तिः ननु प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणं व्यर्थमिति वाच्यं तदनुक्तौ वा
च्यत्वादिरूपसाध्यकस्थले अव्याप्त्यापत्तेः ... प्रतियोग्यवृत्तित्वादिमूलेन तन्निराकरणस्यासंगतत्वापत्तेः न चैवमपि सर्वत्र ...
वत्त्वादिरूपविरोधः वाच्यत्वादेः संयोगसंबंधेन धूमादेः व्यापकत्वादिति वाच्यं ... वाच्यत्वाद्यभावप्रसिद्ध्यादिपदस्य सत्वात् यत्र स्वरूपसंबंधेन सा
ध्यता तत्र वाच्यत्वाद्यभावमादाय संयोगादिसंबंधेन साध्यतायां तद्व्याप्यभावमादाय अतिव्याप्तिपरतयैव तत्संगतिरिति ... मनोन्यत्वाद्यभावस्य
साध्यक ... भूतत्वमूर्तत्वोभयत्वस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्संबंधेन साध्यतायां व्यापकतासंभवात् ... नियामकसंबं
५५ धेनाधिकरणत्वस्य प्रतियोगितावच्छेदकतया ... तेन संबंधेन साध्यतायां ध्वनी चैतन्यादिसद्धेतावव्याप्त्यापत्तेः तद्रूपान्तरूपसंबंधादिसाध्य
कतिव्याप्त्यापत्तेश्च साध्यताघटकसमवायसंबंधेन साध्यव्यापकतावच्छेदकप्रतियोगिताकानां अधिकरणधर्मावच्छिन्नगुणाद्यभावानामसं
भामेव स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वाभावादिति यत्तु विशेषणता विशेषेण साध्यव्यापकत्वे तेनैव प्रतियोगितत्र
तियोगिसामानाधिकरण्यं च संबंधैक्याविवक्षये तस्यार्थमाह ... तदपि गवाद्यभावस्य आत्मत्वाद्यभावस्य सादि ग्रंथस्याल ... कतायाप
... ति नन्वेतावतापि अयमात्मा ज्ञानादिसादावव्याप्त्यापत्तेश्च स्वघटत्वादिना आत्मत्वसामान्याभावस्यापि ... विशि ...
विशिष्टसमानाधिकरणे घटादौ व्यापकता घटकसमवायेन प्रतियोगिसामानाधिकरण्याभावात् अत आह दलांतरेपीति यत्र ... हेत्वधि
करणावच्छेदेन सत्त्वहेत्वधिकरणादौ ... र्थः संबंधभेदनिबंधनो दोषः एकसंबंधेन हेत्वधिकरणत्वं स्वविशिष्टहेत्वधिकरणे यत्रान्यसंबंधेन हेत्वधिक
रणनिरूपण ... दोषः संबंधैक्याविवक्षेणेति हेतुसमानाधिकरणादत्र हेत्वधिकरणत्वं येन संबंधेन स्वविशिष्टहेत्वधिकरणावच्छेदेन सत्त्वहेत्वधि
करणत्वं तेन संबंधेन विवक्ष्येत्यर्थः एवं च दलांतरपदमपि साध्य संगच्छते इति तु न भ्रमः यद्वा धूमवान् वह्नेरित्यादौ अतिव्याप्तिः धूमसामान्याभा
वस्यापि हेत्वधिकरणायोगोलकावच्छेदेन स्वप्रतियोगितस्य कालिकसंबंधेनाश्रयीभूतवह्न्यादेः समानाधिकरणादत आह दलांतरेपीति

प्रतियोगि ... नाधिकरण्यमित्यत्र प्रतियोगितात्रय दलेपीत्यर्थः संबंध ... नो दोषः प्रकृतसाध्यव्यापक ... नावच्छेदकप्र
तियोगिताकाभावस्य ... संबंधावच्छिन्नप्रतियोगिताश्रयीभूतवह्न्यादेः सामानाधिकरण्य ... निबंधनो दोषः संबंधैक्याविवक्षयेति यत्संबंधेन व्या
पकतावच्छेदकं प्रतियोगितस्य प्रतियोगिसामानाधिकरण्यमित्यत्रापि तेन संबंधेन प्र... तियोगिताश्रयत्वविवक्षयेत्यर्थ इति संक्षेपः अत्र संबं
धैक्याविवक्षायां रूपसामान्याभाववान् पृथिवीत्वादन्यपृथिवीत्वाद्गुणादिविरुद्धेतावतिव्याप्तिः साधनसमानाधिकरणात्यंताभावप्रतियोगितावा
च्छेदकस्यापि हेत्वधिकरणपृथिव्यवच्छेदेन अन्यपृथिव्यवच्छेदेन वादिकृतविशेषणतया प्रतियोगिसमानाधिकरणत्वं ... मात्रे
... पाधिसापगमात् न च तस्याल ... नीरूपकमिसाकारक यत्किंचित्प्रमाव्यक्तेर्विषयतासंबंधेन व्यापकत्वात् ...
... स्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः तादृशबुद्धिव्यक्तेः विभिन्नकालीनघटादौ
नापि संबंधेनासत्वादिति वाच्यं विषयतायाः ज्ञानसमानकालीनतया तादृशबुद्ध्यभावदशायामेव रूपशून्ये गगनादौ विषयतासं
बंधेन तद्बुद्ध्यभावप्रतियोगितावच्छिन्नाभावसत्वात् तादृशज्ञानव्यक्त्यभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात् ...
वच्छिन्नान्यधिकरणसाध्यवन्निष्ठेत्यादिव्यापकतायाः तद्बुद्धिव्यक्तौ सत्वेपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य तद्बुद्धिव्यक्तावसत्वे
... इति ... दिना पृथिवीत्वादिकमिति ... दिग्गुपाधि ...
... पृथिवीत्वाद्युपग्रहः ... इति ... प्रलय इति महाप्रलय इत्यर्थः खंडप्रलये तु पार्थिवपरमाणो रूपसत्वे अन्यथा उत्तरसर्गे
पार्थिवद्व्यणुकस्य रूपोत्पत्त्यर्थं परमाणौ पाकांतरकल्पनापत्तेरिति प्रांचः प्रलयस्य पाकेन रूपादेः प्रलयदशायामित्यर्थः तेन महाप्रलयानभ्यु
गमेपि न क्षतिः ... काले च सन्नुच्चारणानिरूपक प्रलयस्य ... उत्कर्षणात् अवयविन्यापि पाकदशायां तत्सत्वेति नग्नघन्मतेतसूपे ननु ती
... घटावच्छेदेन व्यभिचारित्वात् ... आह उत्पन्नेति यच्चपि पाकेन श्यामरूपे नाशकाले ... विनिरूपता

परमाणुः रूपसामान्याभावः साध्यः प्रत्यक्षायोग्यविद्यमानत्वात् हेतोः गगनं दृष्टान्तः

मान्याभावसत्वं तथापि पीलुपाकवादिमते तदसंभवात् अपच्यमानत्वेपि न अनुरोधान्तर उत्पत्तिकालमात्रानुसरणं तत्सत्वादिति रूपसामान्याभावस
त्वादित्यर्थः प्रतियोगिवदिति प्रतियोगिनिवेत्यर्थः द्विक्षणवृत्तिं एकदा एकदेशावृत्तित्वमानाभावादिति प्रलयादावच्छेदेन परमाणवादौ रूपादिसाम
न्याभावे तु योग्यसंनिकर्षाभावे प्रसक्तासम्भवेपि अनुमानादिकमेव मानमस्तीत्याशयः यत्तु उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव
संभवति तदानीं चक्षुः संयुक्तविशेषणतायाः सत्वात् सत्वेपि द्रव्यसमवेतत्वस्याभावप्रत्यक्षहेतौ चक्षुः संयुक्तसमवेतविशेषणतया सत्वेन
५८ संनिकर्षसंभवादिति तन्न चक्षुःसंयोगसमवेतव्यणुकविशेषणतया रूपाभावस्य चाक्षुषापत्तेः चक्षुः संयुक्तयोग्यसमवेतविशेषणतायाः
एवाभावग्राहकत्वेन द्व्यणुकद्रव्यसमवेतत्वस्याभावचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वात् अन्यथा त्रसरेणुष्वपि रूपाभावचाक्षुषापत्तिरिति
ध्येयं वस्तुतः स्वोत्पत्तेः पूर्वक्षणे संयुक्तसमवेतत्वघटितस्य सत्वात् विशेषणताया अपि तदानीमसत्वात् क्रमेण हेतुत्वेन नास्तीति ध्येयम् अतएवेति
ध्वंसप्रागभावयोः रक्तताभावविरोधित्वे मानाभावादेवेत्यर्थः रक्ते श्यामध्वंसप्रागभावयोः सत्वमावेदयितुमन्तरापदं रक्तं रूपमिति न च गुणे गुणाद्युपसर्जनत्व
प्रासनात् रक्तो रूपं नास्तीत्येव प्रयोगो युक्तः इति वाच्यं वक्ष्यमाणविशेषणतापन्नस्यैव रक्तादिशब्दस्य पुंस्त्वानुशासनात् अतएव रक्तं रूपमिति प्रयोगः स
मासे मणिकृतेवक्ष्यतत्प्रतिध्येयं एषु रक्तं रूपं नास्तीत्याकारकः प्रत्ययः पूर्वसादिपदरक्तस्य ध्वंसवति उत्तररक्तस्य प्रागभाववति तदानीं रक्तेपीत्यर्थः न च रक्तता
दशायां वर्तमानस्यापि रक्ततरध्वंसादेः तदानीं रक्तत्वावच्छिन्नप्रतियोगिताकत्वविरहात् न तादृशप्रत्ययस्तस्याव्याप्यवृत्तित्वादिति वाच्यं ध्वंसादिप्रति
योगित्वस्य किंचिद्धर्मानवच्छिन्नत्वात् तत्तदनन्तप्रागभावध्वंसादिषु रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनापेक्षया रक्तत्वावच्छिन्नसत्ताभावसंबन्धस्यैकोत्तरा
भावादिकल्पनायाः लघुत्वात् न च यावतिरक्तरूपाणि तत्तद्व्यक्तिवितरधर्मानवच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावैरेव रक्तं रूपं नास्तीति प्र
त्ययः क्रियते प्रकृते च विद्यमानरूपप्रतियोगिकस्य तादृशाभावस्यासत्वान्न तथा प्रतीतिरिति वाच्यं तथा सत्यन्तराश्यामे रक्तं रूपं नास्तीत्याकारक
निर्णयेपि तत्र रक्तं रूपमस्तीति भ्रमोत्पत्तेः विरोधिनः सामान्याभावस्यानिश्चयात् विशेषाभावकूटनिर्णयस्याप्रतिबन्धकत्वात् अन्यथा सामान्या
भावत्व न सिद्धेरिति भावः प्रत्युत प्रतियोगितासंबन्धेन रूपसमात्रावच्छिन्नप्रकारताकसंसर्गाभावविशेष्यकः प्रत्ययो रूपत्वावच्छिन्नप्रकारता
कबुद्धेर्विरोधीति तत्प्रतियोगितावच्छेदकमेव नातिप्रसङ्गः तादृशाभावरूपत्वावच्छिन्नाभावएव रूपं नास्तीति प्रतीतेर्विषयः किमनुरोधेन रूपध्वंसा

दिमतित्वाभावसिद्धिरिति प्राहुः अन्तरप्रागभावेसमवायेन रक्तं रूपं नास्तीति प्रतीतेः प्रामाण्यानुरोधेनैव ध्वंसप्रागभावयोर्न विरोधः अन्यथा समवायावच्छिन्नप्रतियो
गिताकध्वंसाद्यप्रसिद्ध्या तत्प्रतीतेर्भ्रमत्वापत्तिरिति परमार्थः तत्सामानाधिकरण्यं चेति प्रतियोगिसामानाधिकरण्यं चेत्यर्थः स्वविशिष्टेति स्वपदं लक्षणघटकतत्त
दभावव्यक्तिपरं तथा च तत्तदभावप्रतियोगित्वं यद्धेतुतावच्छेदकघटकसंबन्धेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणं तत्तदवच्छेदेन तत्तदभावस्य स्वप्रतियोगिसामा
नाधिकरण्यं ग्राह्यमित्यर्थः तेन हेतुसमानाधिकरणस्य घटत्वादिनावच्छिन्नाभावस्य कपालिकसंबन्धेन धूमाद्यधिकरणस्य पर्वतादौ व्याप्यवृत्तित्वघटकसंबन्धेन प्रति
योगिसामानाधिकरण्यत्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः न वा द्रव्यं विशिष्टसत्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणगुणाद्यवच्छेदेन
प्रतियोग्यसमानाधिकरणत्वेपि क्षतिः गुणादीनां विशिष्टसत्तावच्छिन्नानधिकरणत्वात् यद्यपि व्याप्यवृत्तेरवच्छेदकत्वे मानाभावात् व्याप्यत्वाभावे
संयुक्तप्रतियोगिसामानाधिकरण्यं तदवच्छेदकत्वं न हेत्वधिकरणस्य संशयं कथितावान् स्तादवस्थ्यं न च तत्स्वविशिष्टहेत्वधिकरणताव्याप्यवृत्तप्रति
योग्यधिकरणतावच्छिन्नत्वं वाच्यं स्वविशिष्टपदवैयर्थ्यापत्तेः प्रतियोग्यधिकरणीभूत स्वविशिष्टहेत्वधिकरणावृत्तित्वस्यौक्तौ चक्रव्यं तद्घटत्वादि
सादेरव्याप्तिः यावद्धेत्वधिकरणाप्रसिद्धेः तथापि यावत्तद्धेतुमद्वृत्तिधर्मो हेत्वधिकरणतानिवाx यावत्x यावन्ति तत्प्रसिद्धत्वप्रतियोगित्वं तु प्रतियोग्यधिक
रणवृत्तित्वस्य विवक्षितत्वाददोषः एकमात्रव्यक्तिरोपितस्तल्लक्षणघटकवृत्तित्वविशिष्टस्य यद्यधिकरणानि सन्ति न तत्राव्याप्तिः न च प्रतियोग्यधिकरण
स्वविशिष्टयावद्धेत्वधिकरणताकत्वमात्रसम्यक् स्वविशिष्टस्य हेतुसमानाधिकरणहेतुस्य च वैयर्थ्यापत्तेः प्रयुक्तमपि स्वविशिष्टपदं यावद्धेत्वधि
करणावच्छेदेनत्वप्रवेशएवार्थवत्त्वतीत्यतः पश्चादुक्तस्यापि तस्य प्रथमं प्रयोजनमाह तेनेति गोत्वादिनामवाधिभावस्य तद्वृत्तिकाले तत्रापि यद्गोत्वे
त्यरो हिताद्रोनातिप्रसंगः इति ज्ञनेदमुपलक्षणं तत्तद्योगोलक्षणस्य ताधभावस्यापि कालेप्रतियोगिसमानाधिकरणत्वात् धूमवान् वह्नेरित्यादा
वतिप्रसंगोद्रष्टव्यः गवाद्यभावस्य प्रतियोग्यधिकरणे देशिकसंबन्धेनापि वर्तितुमुपपादयितुमाह गवाद्यनधिकरणेति इदानीं चत्वरे गोर्ना
स्तीति प्रत्ययात् गोमत्यपि काले कालिकसंबन्धावच्छिन्नगवाद्यभावस्य गवाद्यनधिकरणचत्वरावच्छेदेन वृत्तौ न विरोधः न चैतत्सत्ये सत्वरएवैतत्
कालावच्छेदेन गवाद्यसत्तामीतोपि विषयत्वं वाच्यं देशादनौ कालस्यैव कालत्वान्तौ देशस्यावच्छेदकत्वानुभवात् एकदेशवस्थकोंगौ भेदकत्वात् ननु

श्री

गगने गोत्वं नास्तीति प्रतीतेर्गगनाभावस्यैतत्कालावच्छेदेन गगनवृत्तित्वावगमादितात्पर्यं महाप्रलये च गवाद्यभावस्य गगनादौ सत्त्वे दिक्कालेन आप्यत्वाभावात्
कालावच्छेदेन सत्त्वसंभवादिति भावः तदुक्तिमिति गदादिमतीत्यर्थः क्वचित् जन्यकाले नन्तु चरमध्वंसाद्युत्कर्षस्य प्रलयाभावाभावस्यापि यावदन्तर्गतत्वात्तस्य
चरमक्षणे प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरत आह महाप्रलयेति तथा च तस्यापि महाप्रलयकालप्रतियोगिसामानाधिकरण्यं तस्य का
लिकसंबंधेन जगदाधारत्वादिति भावः ननु गोत्वादिज्ञानोपि प्रलये कालिकसंबंधेन सत्त्वे प्रमाणाभावात् यद्गोत्वं तद्गोत्वादिनिसकृतत्वेपि तथा दिक्कायानादा
(५) प्याह यत्किंचिदिति उक्तविवक्षणादेः घटादिसाधारणरूपेणापि गोत्वाद्यभावसाध्यतायामतिव्याप्तिरित्याशयेन साध्यान्तरमाह ज्ञानत्वमिति द्रव्यत्वसाध्य
तायां कालत्वसहकृते एव प्रलयेपि कालिकसंबंधेपि परमाणवादेः सत्त्वात् कार्यद्रव्यानधिकरणत्वे सति द्रव्यत्वेन धर्मिग्राहकप्रमाणेन तत्सिद्धेः रूपत्वाद्यभावादि
तत्संपत्तये जन्यपदं ननु महाप्रलयानंगीकारे प्राचुर्यहेतुयं खण्डप्रलयेपि ब्रह्माण्डान्तरे जन्यद्रव्यसत्त्वादतः साध्यान्तरमाह प्रलयादिति [illegible]
[illegible]त्यर्थः यद्यपि प्रतियोगिनोयदधिकरणं तद्वृत्तित्वस्यैव दैशिकविशेषणतासंबंधेन विवक्षावाम्यपि यद्गोत्वं तद्गोत्वादिरसा [illegible]
संभवति प्रलयादित्वसाध्यवह्निभावस्य स्वप्रतियोग्यधिकरणे महाकालादौ दैशिकसंबंधेन वृत्तित्वविरहात् न च द्रव्यमहाकालत्वादिसाध्यव्याप्तिः
कालिकसंबंधेन महाकालनिष्ठस्य घटत्वाद्यभावस्य स्वप्रतियोग्यधिकरणे दैशिकविशेषणतया वृत्त्यभावादिति वाच्यं हेतुसमानाधिकरणत्वस्यापि
तादृशविशेषणतया विशेषणीयत्वात् प्रतियोगि[illegible]रूपाभिन्नगुणत्वादिसाध्ये साधनसामानाधिकरण्यस्य रूपान्यत्वाद्यभावस्य रूपाभिन्नत्वप्रकारक
मात्रविशेष्यतादेरभावस्य रूपत्वादिस्वरूपतया तस्य दैशिकविशेषणतया वृत्तित्वविरहेण यावदन्तर्गतत्वात् घटत्वादिना रूपाभिन्नत्वाद्यभावस्य च सर्व
स्यैव तादृशाभावस्य कालादौ स्वप्रतियोगिसमानाधिकरणत्वात् अतः स्वविशिष्टहेत्वधिकरणेत्यादिविवक्षानुसरणमिति वदन्ति वस्तुतो दैशिकवि
शेषणताघटितस्य लक्षणान्तरत्वादेकेनापरस्यान्यथाकर्तुमशक्यत्वात् उक्तविवक्षणे न वैयर्थ्यमिति ध्येयं यत्तु हेत्वधिकरणे विशेषणतया वर्त
मानानां निरूपकत्वावच्छिन्नानां प्रतियोगिकं नित्यमेव विशेषणतासंबंधेनोचितं प्रतियोग्यधिकरणवृत्तित्वप्रवेशो तिगौरवात् सर्वत्र व्यभिचारित्व
[illegible] भावमादायातिव्याप्त्यभावादिति तन्न स्वरूपेणैव विशिष्टानां केवलान्वयिधर्माणामसत्ताभावस्य स्वप्रतियोग्यवृत्तित्वनासं

भवापत्तेः नहि वाच्यत्वादिनिष्ठविशिष्टानां केवलान्वयिधर्माणां वाच्यत्वादिनाभावो घटत्वादिरूपप्रतियोगिवृत्तिरिति दिक् प्राचां मते स्वयोग
सामान्याभावसाध्यकसंयोगः व्यभिचारी सतः कथमपि प्रतियोगिवैयधिकरण्यघटितमेव साध्यव्यापकत्वमत्र विवक्षितं यथा संनिवेशे वैयर्थ्य
विरहात् अतस्तदवच्छेदकत्वं संयोगाभावनिष्ठप्रतियोगित्वस्य पक्षतमेवमात्रयेनसंयोगात्मकाभावस्याभिधानं तद्घटितसाध्यव्यापकतायाः प्रवेशेन
गगनत्वादिविशिष्टस्य वाच्यत्वाद्यभावस्य गगनत्ववाच्यत्वोभयाभाववदि यावदन्तर्गतस्य च हेत्वधिकरणीभूतगगनावच्छेदेन प्रतियोगिसमानाधि
करणत्वेन उक्तव्याप्तिरतः स्वविशिष्टपदं एतदभिप्रायेणैव संयोगाद्यात्मकाभावे सत्त्वादिपदमुपात्तं वस्तुतः सत्तावान्द्रव्यत्वात् गुणत्ववद्रूपत्वात् इ
त्यादौ कालेऽजन्यरूपवद्धेतुसमानाधिकरणस्य सत्ताभावस्य गुणत्वसामान्याभावस्य च केनापि संबंधेनात्मगगनादौ निरूपेणावदन्नित्यहेत्वधिकर
णावच्छेदेन तस्यैव यावदन्तर्गतस्य प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः स्यादिति स्वविशिष्टपदं नस्यादिति दिक् ननु धूमसाध्यकवह्नि
जलादिनिष्ठविशिष्टस्य गोत्वाद्यभावस्याभावो धूमाद्यभाव एव अभावप्रतियोगिकस्याभावाधिकरणकस्याभावाधिकरणस्वरूपत्वात् स्या
तथा च पर्वतादौ साध्यवह्न्यादिहेतावतिव्याप्तिः धूमाद्यभावस्य हेत्वधिकरणावच्छेदेन गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वादत आ
ह [illegible]दिवृत्तिरिति नच तदभावस्य धूमाभावस्वरूपत्वेपि जलादौ न तादृशाभावत्वावच्छिन्नाधिकरणत्वं किंतु धूमाभावत्वावच्छिन्नाधिकरणत्वमे
वेति न प्रसंगातिव्याप्तिरिति वाच्यं एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसंगात् उक्तक्रमेणैवातिप्रसंगस्यावारणसंभवादिति भावः ननु तथापि धूम
वत्त्वे हेतौ विशादावव्याप्तिः समनियताभावानामैक्यात् धूमाभावस्यैव वह्निधूमोभयाभावाद्योगोलकान्यत्वाभावादेश्चायोगोलकभेदत्वादि
त्येतत्सामान्याभावात् अभिन्नस्य हेत्वधिकरणावच्छेदेनैव वह्न्यादिभेदाद्यात्मकप्रतियोगिसमानाधिकरणत्वादिति चेत् अत्राहुः साध्यस्य
फलतः प्रतियोगिताविशेषणत्वेन साध्यव्यापकतावच्छेदकीभूतयद्धर्मप्रतियोगिताकाभावः तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्प्रति
योगिताश्रयसामानाधिकरण्यं विवक्षितं तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठतादृशप्रतियोगितायाः स्वधूमादिनिष्ठप्रतियो

२७. गिताश्रयेण धूमादिना हेतुमदधिकरणावच्छेदेन तत्प्रतियोगिताश्रयसामानाधिकरण्यविरहान्नातिव्याप्तिः नचैवं यत्समानाधिकरणा हेतुस्तद्देयत्वप्रमि
तिवाच्यं आत्मत्वसामान्याभावीयप्रतियोगिताया अपि साध्यव्यापकतावच्छेदकतया तत्प्रतियोगिताकस्यात्मत्वसामान्याभावस्य तादृशप्रति
योगिताश्रयसामानाधिकरण्यविरहात् अयमात्मा ज्ञानादित्यादावव्याप्तिवारकत्वात् जलादिवृत्तित्वविशिष्टत्वादिरूपस्य वस्तुगतिमनुरु
ध्यैवोक्तेः तेन तादृशाभावस्य धूमाभावत्वरूपेणापि तस्य हेत्वधिकरणावच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताश्रयसा
५८ मानाधिकरण्यविरहादिति व्याप्तिमाने पि नासंगतिः नच धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तदेव धूमत्वेन प्रमेयसामान्यनिष्ठ
प्रतियोगित्वं लाघवात् न तु तद्भिन्नप्रतियोगिता तयोरवच्छेदकभेदेन विवक्षायाश्च प्रतिकारादिति वाच्यं स्वरूपसंबंधात्मिकायाः प्रतियोगितायाः
सामान्याभावस्थले पि प्रतियोगिभेदेनैव भिन्नत्वादिति सांप्रदायिकाः वस्तुतः साध्यव्यापकतावच्छेदिकायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नाया या
दृशप्रतियोगिताया निरूपको यो भावस्तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसामानाधिकरण्यमेव वक्तव्यं तथाच
धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसामान्याभावस्यानतिरिक्तत्वे पि तदीयप्रमेयसामान्यनिष्ठप्रतियोगित्वं स्वन्यूनवृत्तिनैव धूमत्वा
दिधर्मेणावच्छिन्नमतो न तादृशप्रतियोगिताश्रयसामानाधिकरण्यमुपादायातिप्रसंग इति [illegible] यत्तु समनीयता भावना मे
कामते धूमवान् वह्नेरित्यादावतिव्याप्तिवारणार्थं येन संबंधेन साध्यव्यापकता तैस्तैः प्रत्येकं प्रत्येकप्रतियोगिसामानाधिकरण्यं विवक्षि
तं तथाच व्याप्तिवादिमात्रेणैव यत्राधिकरणे व्यभिचारः तदन्यत्वस्य स्वात्मकस्वरूपसंबंधेनापि साध्यव्यापकत्वात् भावस्य च हेत्वधिकरणा
वच्छेदेन तादृशान्यत्वस्वरूपसंबंधेन स्वप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः अतएव विषयतासंबंधेन साध्यव्यापकताघ
टकत्वे पि निसद्ज्ञानान्निसस्सविषयकत्वादित्यादौ नातिव्याप्तिः निसज्ज्ञानत्वाद्यभावस्य व्यापकता संबंधेन प्रतियोगिसामानाधिकरण्यप्रादि
तिमत्तं तन्न घटत्वादिना वा घटत्वाद्यभावस्यैव घटत्वादिनायः पिंडान्यत्वाभावस्वरूपतया तस्य व्यापकता घटकेनायः पिंडान्यत्वेन निरू

पितस्वरूपसंबंधेन यावद्धेत्वधिकरणे प्रतियोगितासामान्याधिकरण्यविरहादेव धूमवान् वह्नेरित्यादावतिव्याप्तिविरहात् यावंतद्धेतुस्वविशिष्टस्य
यत्समानाधिकरणा हेतुस्तस्य व्यर्थतापत्ते इति दिक् ॥ ननु व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वेन सर्वत्र संग्रहे घटत्वादिविशिष्टत्वाव्यतावच्छाभावं गगनत्वावच्छ
सोप्यभावं वा समादाय प्रोक्तलक्षणासंभवात् प्रतियोग्यवृत्तित्वेतिमूलावतारानुपपत्तेः नच वैशिष्ट्यामज्यवृत्तिधर्मानवच्छिन्नत्वेन व्यापकतावच्छे
दकीभूतप्रतियोगिताया विशेषणीयत्वान्नैवमिति वाच्यं व्यभिचारावारकत्वेन तादृशविशेषणस्य वैयर्थ्यत्वात् अन्यथा व्यधिकरणधर्मावच्छिन्नसमा
नकालीनत्वेन हेतुविशेषणेवयं यथावतरे कुतो न समर्थयेत् अतो लक्षणांतरमाह यत्समानाधिकरणानामित्यादिना वह्निमान् धूमात् इत्यस्वानुनरू
व्यत्वादित्यादावव्याप्तिः साध्यव्यापकप्रतियोगिकानां जलत्वविशिष्टद्रव्यत्वाद्यभावगुणत्वविशिष्टसत्ताद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्र
तियोगितावच्छेदकीभूतजलत्वविशिष्टद्रव्यत्वाद्यवच्छिन्नसामानाधिकरण्याभावादतउक्तं रूपावच्छिन्नेति तथाच जलत्वविशिष्टद्रव्यत्वादेः सा
ध्यव्यापकतानवच्छेदकत्वान्न दोषः यत्तु साध्यव्यापकप्रतियोगिताकस्य घटत्वेन वह्न्याद्यभावस्य यावद्धेत्वधिकरणे घटत्वावच्छिन्नसामानाधिकरण्या
भावात् व्यापकतावच्छेदकरूपावच्छिन्नेति तदसंगतमसत् घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभावतया तस्यापि यावद्धेतुमत्स्वप्रतियोगितावच्छेदकी
भूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात् ननु समवायित्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वात् तदवच्छिन्नवाच्यत्वाभावस्य मूलोक्तस्य लक्षणा
घटत्वात् अत आह हेत्वधिकरणेति शेषमित्यादि येन संबंधेन हेतुत्वं तेन हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वमभावविशेषणं तेनायमात्मा
ज्ञानात् घटान्यत्वस्मति घटात्मत्वसंयोगात् इत्यादिवात्मत्वसामान्याभावस्य तथात्वे पि नाव्याप्तिः एवं येन संबंधेन व्यापकता तत्संबंधावच्छिन्नप्र
तियोगिताकाभावस्य स्वप्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यं अतो न व्यधिकरणधर्माव
च्छिन्नाभावस्य सत्वे पि व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणासंभवात् प्रतियोग्यवृत्तित्वेत्यादिग्रंथावतारकत्वानुपप
त्तिः नवा लंजत्वादेः समवायेन साध्यतायामप्यकालत्वादावतिव्याप्तिः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणा

गा॥ वच्छेदेन बोध्यं तेन द्रव्यत्वसत्वादिसाध्ये द्रव्यत्वाद्यभावस्य केवलहेतुमति प्रतियोगिसमानाधिकरणत्वेपि नातिव्याप्तिः इदं तु बोध्यं साध्यवन्निष्ठाभावप्रतियो
गितायाः सामानाधिकरण्येनानवच्छेदकत्वमेव व्यापकतावच्छेदकत्वमत्र पूर्वलक्षणे प्रवेश्यं ननु प्रतियोगिवैयधिकरण्यघटितं तथा सति यत्किंचिदधिकर
व्याप्ति १ णधर्मावच्छिन्नाभावासहेतुमति सर्वं प्रमेयमित्याकारकयत्किंचिद्बुद्धिविषयत्वसामान्याभावमादायैव सर्वत्र लक्षणासमन्वयः संभवे प्रतियोग्यवृत्तित्वे
त्वादिघटितस्यानुपपत्तिः तज्ज्ञानव्यक्तिविषयत्वस्य तादृशज्ञानदशायामेव सत्वेन तदसत्वदशायामेव तादृशज्ञानविषयत्वाभावस्य हेतुसमा
नाधिकरणत्वात् एवं चात्र स्वविशिष्टपदं न कपिसंयोगाद्यात्मकाभावं गगनत्वादिविशिष्टवाच्यत्वाद्यभावमादाय कपिसंयोगाभाववान् प्रमे
५८ यत्वादित्यादावव्याप्तिवारकं कपिसंयोगाभावत्वादेरुक्तव्यापकतावच्छेदकत्वाभावात् किंतु हेतुमतिकाले वर्तमानत्वस्य तत्सामान्याभा
वस्यापि निरुक्तरूपशालित्वात् तस्य चात्माद्यवसत्वेन यावद्धेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहात् सत्तावान् द्रव्य
त्वादित्यादावव्याप्तिवारकमेव स्वविशिष्टपदं न च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभाव यावद्धेत्वधि
करणावच्छेदेन स्वावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वमित्येव सम्यक् वाच्यत्वत्वादिना घटाद्यभावमादायैव वा
च्यं ज्ञेयत्वादित्यादौ लक्षणासमन्वयादिति वाच्यं स्वरूपसंबंधेन प्रमेयत्वावच्छिन्नाभावाप्रसिद्ध्या प्रमेयवान् वाच्यत्वादित्यादावव्याप्तेः गुरु
धर्मावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या प्रमेयवह्निमान् धूमादित्यादावव्याप्तेः वृत्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकतया गोमात्र
त्वादित्यादौ स्वामित्वसंबंधेन गवादेः साध्यतायामव्याप्तिश्चेति दिक् ननु वह्नित्वेन धूमवद्वृत्तिसामान्याभावो धूमीयसंयोगेन द्रव्य
सामान्याभावो वा धूमाभाव एव तथा यो गोलके भेदः तदभावान्यतरत्वेनायोगोलकान्यत्वेनोभयाभावायोगोलकान्यतरस्वरूपसंबंधेन भेदसा
मान्याभावो वायोगोलकान्यत्वाभाव एव समनियताभावानामैक्यात् तथा च धूमाद्यभावस्य प्रतियोगितावच्छेदकं यद्वह्नित्वादि तदव
च्छिन्नेनैव समं यावद्धेत्वधिकरणे धूमाद्यभावस्य प्रतियोगितासमानाधिकरणत्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिः सामान्यधर्मे विशि

ष्टाभावाभ्युपगमे तु सुतरां तथा धूमत्वेन धूमाद्यभावस्य प्रमेयत्वादिना धूमाभाववत्तया तस्य स्वप्रतियोगितावच्छेदकीभूतप्रमेयत्वावच्छिन्नसमानाधिकरणत्वा
दिति चेत् अत्रापि यो यत्पदस्य फलतः प्रतियोगित्वस्य विशेषणतया साध्यव्यापकतावच्छेदकरूपावच्छिन्नयत्प्रतियोगिताकोपस्य सामानाधिकरण्याभावः स्वनि
ष्ठहेत्वधिकरणावच्छेदेन तत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरण्यस्यत्वपर्यवसितार्थः तथा च धूमादिनिष्ठतादृशधूमत्वावच्छिन्नप्रतियोगिताकाभावस्य
धूमादिनिष्ठप्रतियोगितावच्छेदकीभूतधूमत्वावच्छिन्नेन हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहात् नातिप्रसंग इति सांप्रदायिकाः वस्तुतः अत्रापि सा
ध्यव्यापकतावच्छेदकरूपावच्छिन्नतयाऽस्वन्यूनवृत्तिधर्मानवच्छिन्नया यादृशप्रतियोगितया निरूपित अभावत्वस्य तादृशप्रतियोगितायाः यदवच्छेदकं तदव
च्छिन्नसामानाधिकरण्यं वक्तव्यं धूमत्वादिना धूमाद्यभावस्तु न प्रमेयत्वादिना धूमाद्यभावः सामान्यधर्मे विशेषाभावस्यानभ्युपगमात् तदभ्युपगमे
तु तादृशप्रतियोगिताकाभावे प्रतियोगितावच्छेदकावच्छिन्नवृत्तित्वस्य जगद्वृत्तिभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृ
शप्रतियोगिताकाभावानां तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यं अतो न कश्चिद्दोष इति ध्येयं इति लक्षणं चक्रवर्तिल
क्षणमाह केचित्त्विति अनवच्छेदकमिति यत्साध्यतावच्छेदकमिति परेणान्वितं घटत्वादिना वह्न्यभावमादाय वह्निमान् धूमादित्यादौ लक्षणसंगतिः
व्यभिचारिणि हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियोगितावच्छेदकं साध्यतावच्छेदकमतो नातिव्याप्तिः कपिसंयोग्येतद्वृक्षत्वादि
त्यादावव्याप्तिवारणार्थं व्याप्यवृत्तीति वह्नित्वादिना घटाद्यभावमादायाव्याप्तिरतः साध्येति अत्र प्रतियोगितासाध्यतावच्छेदकसंबंधेन ग्राह्या तेन
समवायादिसंबंधेन वह्न्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वेपि वह्नित्वादेर्नासंभवः प्रतियोगिवैयधिकरण्यस्य प्रवेशो वा चांद्रे
यत्वादित्यादावव्याप्तिः प्रतियोगिव्यधिकरणसाध्याभावस्याप्रसिद्धेरत एव सप्रिसंगः व्याप्यवृत्तित्वं निरवच्छिन्नत्वं हेत्वधिकरणवृत्तित्वं हेत्वधिकरणय
त्किंचिद्व्यक्तिवृत्तित्वं प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यदभावव्यक्तिवृत्तित्वं वा एवं चैतत्कालाभावमेव हेतुसमानाधिकरणत्वमुक्तं न तु
त्वातं क्रमेण तद्विशेषणवैयर्थ्यात् यत्किंचिन्निवेशाच्च कपिसंयोगाभावस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगितेपि कपिसंयोगित्वा
दिसाध्ये नातिव्याप्तिः ननु समनियताभावानामैक्यात् घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभाववत्त्वाद्धेतुसमानाधिकरणस्यैव तादृशसा

धाभावस्य प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिरतः समनियताभावैक्यमतेपि निरुक्तिमाह हेतुसमानाधिकरणस्येति व्याप्यवतोरभावस्य प्रतियोगि
तायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना नन्वत्रापि हेतुसमानाधिकरणस्य वह्नित्वेन वह्निभिन्नाभावस्य वह्नि हेतु पर्वता
दितेरभावस्य च प्रतियोगितायाः समानाधिकरणं सदेव वह्नित्वमवच्छेदकमिति अव्याप्तिः तादृशप्रतियोगितायाः अन्यूनवृत्तित्वे सति यदवच्छेदकं तद
६० न्यत्वोक्तावपि तथा पर्वते वह्नित्वेन तार्णा तार्णोभयं नास्तीति प्रतीतिसिद्धस्यैव तादृशाभावस्य प्रतियोगितावच्छेदकत्वेन वह्नित्वस्य न च प्रतियोगिताव
च्छेदकत्वं न वह्नित्वमात्रे पर्याप्तं किंतु तार्णा तार्णोभयत्वेपि अन्यथा तादृशप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नवति पर्वतादौ तादृशाभावा
प्रसंग इति वाच्यं सोयं मते प्रतियोगितावच्छेदकधर्मावच्छिन्नसत्तामात्रस्याभावाविरोधित्वात् अन्यथा घटवत्यपि घटत्वेन पटाभावाप
लापापत्तेः किंतु प्रतीतिबलाद्व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ सर्वप्रतियोग्यंशे प्रकारीभूतधर्मविशिष्टप्रतियोगि
तावच्छेदकावच्छिन्नेनैव सार्धं अभावस्य विरोधित्वं वाच्यं तेन तद्वह्नित्वादिना तार्णा तार्णोभयाभावादिसत्वेपि न क्षतिः करं अत
एव द्रव्यत्वेन वह्निर्नास्तीत्याहारकप्रतीतिः सामान्यधर्मेण विशेषाभावो ह्युपपद्यते न च तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं भासते द्रव्यत्वस्य
वैशिष्ट्यमात्रं विषय इति वाच्यं वह्निमानयमिति निर्णयसत्वेपि द्रव्यत्वेन वह्निर्नास्तीति प्रसंगात् द्रव्यत्वस्यैवावच्छेदकतया भानात् अन्यथा वह्नि
त्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वप्रकारेण वह्न्यभावबुद्धौ वह्नित्वेन वह्निमत्तानिश्चयस्य प्रतिबंधकत्वात् तादृशप्रतीत्यसंभ
वापत्तेः अस्माकं तु द्रव्यत्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धौ प्रति द्रव्यत्वेन वह्नित्वविशिष्टनिश्चयस्य विरोधित्वात् तदसत्वादेव तादृशाभा
वप्रतीतिसंभवात् तल्लक्षणांतरमाह प्रतियोगिव्यधिकरणस्येति केचित्तु सामानाधिकरण्यभमिपंदं तथा च हेतुसमानाधिकरणाभावीय यावन्निष्ठप्रति
योगितायाः अवच्छेदकं यत्तत् हेतुमत्त्वं साध्यतावच्छेदके विवक्षितं प्रतियोगित्वं स्वरूपसंबंधविशेषः स च सामान्याभावत्वे प्रतियोगितावच्छेदकस्वरूप
एव न तु प्रतियोगिस्वरूपः अननुगमात् अभेदेनाधाराधेयभावानुपपत्तेश्च सामान्यधर्मेण विशेषाभावस्थले च प्रतियोग्यंशे प्रकारीभूतधर्मवि

शेष एव तथा न तु सामान्यधर्मः अतिप्रसक्तत्वात् व्यधिकरणधर्मावच्छिन्नाभावस्थले तु प्रतियोगितावच्छेदकस्वरूपं न प्रतियोगित्वं किंतु अतिरिक्तमेव अन्यथा प्रतियो
गितावच्छेदकविशिष्टप्रतियोगिनैव सार्धं अभावस्य विरोधात् तदवच्छिन्नवति तादृशाभावासत्वप्रसंगात् विवादेप्यतिरिक्तायाः प्रतियोगितायामेव अन्य
था समनियताभावैक्यमते निखिलव्यधिकरणधर्मावच्छिन्नाभावस्यैव गगनाभावात्मकतया गगनाभावस्वीकर्तॄणां चिंतामणिकाराणां तदनंगीका
रानुपपत्तेः इत्थं च तार्णा तार्णोभयं नास्तीति प्रतीतिबलात् तादृशाभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्वेपि तादृशप्रतियोगित्वं न वह्नित्वस्वरूपं
किंतु तादृशोभयत्वाभिन्नमतिरिक्तं वा तथा च स्वाभिन्नायाः साधनवन्निष्ठाभावप्रतियोगितायाः यदवच्छेदकं तदन्यत्वस्य वह्नित्वे सत्वान्न धूमवद्व्यापकता
वच्छेदकत्वहानिः ननु अवलक्षणेपि हेतुसमानाधिकरणत्वमभावस्य संबंधमात्रेण न वाच्यं वह्निसामान्याभावस्यापि कालिकादिसंबंधेन धूमवति सत्वा
दव्याप्त्यापत्तेः नापि दैशिकविशेषणताविशेषसंबंधेन घटभिन्नद्रव्यत्वादिसाध्यकव्याप्त्यापत्तेः घटत्वस्वरूपस्य साध्याभावस्य दैशिकविशेष
णतया वन्निष्ठविरहादिसत्वात् लक्षणांतरमाह प्रतियोगिव्यधिकरणस्यैवेति प्राञ्चः अपरे तु प्रागुक्तं व्याप्यवान्निति यत्किंचिद्दृष्टं तेन दुर्वचनम
तः अत्र तु कालिकसंबंधावच्छिन्नप्रतियोगिताक आकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः आकाशाभावात्मकस्य साध्याभावस्य
निरवच्छिन्नवृत्तिकत्वात् प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकं मतः प्रतियोगिव्यधिकरणस्यैवेति लक्षणांतरमुक्तमित्याहुः हेतुसमानाधि
करणस्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना अथात्र प्रति
योगिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधिकरणभिन्नत्वं समनियताभावानामसिद्धत्वतया घटत्वेन घटाभावादेरपि घटत्वेन प्रमेयसामान्याभाव
स्वरूपता तस्य च प्रमेयान्यक प्रतियोगिसमानाधिकरणत्वात् तदन्यत्वासंभवात् अत एव स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणायेत
समपि न तथा घटत्वेन घटाभावादेरेव प्रमेयत्वादिना घटाद्यभावस्य द्रव्यत्वेन घटवह्न्यतेरभावस्य वा तादात्म्योपगमात् प्रसिद्ध्यापत्तेः व्यधिकरण
धर्मावच्छिन्नाभावस्यापि तत एव वारणासंभवात् अव्याप्तिवारक सामानाधिकरण्येन तस्य वैयर्थ्यापाताच्च न च साध्यतावच्छेदकस्

ना॰ संबंधेन यादृशप्रतियोगिताश्रयानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितं प्रतियोगित्वं तात्पर्यं। तथा च वह्नित्वेन घटाद्यभावीयं घटादिनिष्ठं प्रतियोगित्वमपि
तादृशमतत्स्वावच्छेदकत्वं वह्नित्वेऽप्यस्तीति सामानाधिकरण्यपदं तेन तादृशप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकाप्रसिध्या तद्भिन्नप्रतियोगिते
वलक्षणाघटितेति वाच्यं विशिष्टसत्तावान् जातेरित्यादावतिव्याप्यापत्तेः। गुणादीनामपि विशिष्टसत्तानिष्ठप्रतियोगिताश्रयाधिकरणत्वात्। घटवान्
महाकालत्वादित्यादावव्याप्तिप्रसंगात्। हेतुमतो महाकालस्य साध्यतावच्छेदककालिकसंबंधेन पटाद्यभावप्रतियोगिताश्रयाधिकरणतया प्रति
६ योगिव्यधिकरणाभावाप्रसिद्धेरिति चेदत्राहुः। साध्यतावच्छेदकसंबंधेन स्वाश्रयवृत्तित्वस्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्धेत्वधिकरणी
कः। यावत्प्रतियोगि[illegible]तादृशप्रतियोगित्वं प्रतियोगितात्वार्थः। तथा च वह्नित्वेन घटाद्यभावस्यापि घटादिनिष्ठप्रतियोगिता तादृशीतितर
न्यत्वं वह्नित्वे सतीमतः सामानाधिकरण्यपदं घटवान् महाकालत्वादित्यादौ तु गगनाभावीयगगननिष्ठप्रतियोगित्वमेव तादृशं प्रतियोगित्वं सुलभ
मिति न कोऽपि दोषः। वस्तुतो धूमवति वह्निघटो नास्तीतिवत् धूमवान् वह्नित्वेन न घटवान् किंतु घटत्वेनेति प्रतीतिबलात् व्यधिकरणधर्मावच्छिन्नावच्छेद
कतानिरूपितप्रतियोगिताकोऽप्यभावोऽप्यस्ति अत एव समवायित्वावाच्यत्वं दोघटादौ पक्षधरमिश्रैः स्वीकृतः। तथा च यादृशप्रतियोगिता
वच्छेदकावच्छिन्नीयत्वेन साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रयाधिकरणान्यत्वं हेतुमतस्तादृशप्रतियोगितासामानाधिकरण्यावच्छि
न्नावच्छिन्नप्रतियोगिताक तादृशप्रतियोगितावच्छेदकाभाववत्त्वं तादृशप्रतियोगितावच्छेदकान्यत्वं वा साध्यतावच्छेदकं विवक्षितं तथा च घटादिनिष्ठ
स्य वह्नित्वेन घटाद्यभावप्रतियोगित्वस्यापि तादृशत्वेन वह्नित्वादेस्तदवच्छेदकत्वाद् व्याप्तिरतः सामानाधिकरण्येनेत्युक्तं तथा च वह्नित्वस्य ताद
शप्रतियोगितावच्छेदकत्वेऽपि तादृशप्रतियोगितासमानाधिकरणावृत्तित्वरूपव्यधिकरणधर्मस्य तादृशप्रतियोगितावच्छेदकत्वाभावस्य
तत्र सत्त्वान्नाव्याप्तिः। कालो घटवान् महाकालत्वादित्यादौ तु घटादिसामान्याभावप्रतियोगिताया अत एवापि घटत्वेन पटाभावप्रतियो
गिताया दायेन [illegible] कालः पटत्वेन पटवान् न तु घटत्वेनेत्यनुभवात् वह्नित्वादिसामान्यधर्मेण महानसीयवह्न्याद्यभावसत्त्व

[illegible]प्रतियोगितावच्छेदकत्वस्य [illegible] तत्सामानाधिकरण्ये यद्वत्तदन्यत्वं नातो व्यधिक २
रणधर्मावच्छिन्नप्रतियोगितायाः तद्रूपेणाभावसामानाधिकरण्यं दत्तवेऽप्यधर्ममितस्मा[illegible] उरुचरणाः। युक्तं यत्प्रतियोगितावच्छेदकविशि
ष्टस्य यत्प्रतियोगिताश्रयस्य च [illegible] साध्यतावच्छेदकसंबंधेनानधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितात्वार्थः। तथा वह्नित्वे
न घटाद्यभावस्य घटनिष्ठप्रतियोगितायापि तादृशत्वाद्वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरतः सामानाधिकरण्येनेति प्रागुक्तार्थक
एतन्मते च सामान्यरूपेण विशेषाभावानभ्युपगमात् नातो वह्नित्वेन तद्रूपविशेषमादायाव्याप्तिः नच स्वरूपसंबंधात्मकप्रतियोगिता
याः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान् धूमादित्यादावव्याप्तिः वह्निसामान्याभावीयं यन्महानसीयवह्निनिष्ठप्रतियोगित्वं तदेव
[illegible] वह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतमहानसीयचत्वरीयवह्न्योरनधिकरणत्वस्य हेतुमति पर्वते सत्त्वादिति वाच्यं प्र
तियोगिव्यक्तीनां भेदेऽपि एकधर्मावच्छिन्नप्रतियोगिताया लाघवेनैक्यस्वीकारात् नच कालो घटवान् महाकालत्वादित्यादौ तादृशप्रति
योगित्वाप्रसिध्याव्याप्तिः गगनाद्यभावीयप्रतियोगिताश्रयीभूतगगनस्याधिकरणाप्रसिध्या तादृशप्रतियोगितायाः लक्षणाघट
कत्वादिति वाच्यं महाकालान्यत्वविशिष्टघटाद्यभावस्य तादृशं दैशिकघटत्वावच्छिन्नप्रतियोगिताश्रयत्वे तथात्वात् यत्प्रतियोगितावच्छेद
कविशिष्टप्रतियोगिताश्रयोऽभ्युपगम्यते हेत्वधिकरणनिष्ठाभावप्रतियोगितावच्छेदकं तादृशप्रतियोगितायाएवानिवेश्यतया घटत्वेन ग
गनाभावादिकमादायैव तल्लक्षणसंभवश्चेत्याहुः। तन्न प्रतियोगिभेदेऽपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगितायाश्च भेदस्यैव
ह्नित्वेन घटाद्यभावस्य यावद्वह्नित्वावच्छिन्नाधारनिष्ठप्रतियोगिता सैव वह्नित्वेन वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्नधूमादिनिष्ठ
प्रतियोगिता लाघवात् तथा च सामानाधिकरण्येन [illegible] वह्नित्वेन घटाभावीयं यत्पटनिष्ठप्रतियोगित्वं तदवच्छेदकी
भूतवह्नित्वविशिष्टस्य तादृशप्रतियोगिताश्रयीभूतवह्निधूमोभयादेश्च [illegible] रणत्वस्य सत्त्वे [illegible] हेतुमति [illegible]

जा अधिकरणधर्मावच्छिन्नप्रतियोगितायाः लक्षणाघटकत्वादित्यादिकं एवं चेति तथा चाव्यभिचारस्य पारिभाषिकत्वान्न दोषः इति न प्रतीतिरिति भावः न
च्छिन्नाधिकरणे वह्निमत्पर्वताभाववति धूमादेर्वर्तमानत्वादव्याप्तिरुक्ता साध्येति अत्र साध्याभावो व्याप्यवृत्तिर्बोध्यः एवं परत्रापि विशिष्टेति महानसीयत्वादि
विशिष्टवह्नित्वावच्छिन्नप्रतियोगितेत्यर्थः ननु विशिष्टस्यातिरिक्तत्वात् महानसीयत्ववह्नित्वयोर्वैशिष्ट्यस्यैव व्यापकत्वपर्याप्तत्वात्तदवच्छेदकत्वान्नैष
६२ दोष इत्यत आह केवलवह्नित्वेपि ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगी सत्त्वादित्यत्रातिव्याप्तिः स्वसमानाधिकरणाभावप्रतियोगित्व
स्वरूपस्याव्याप्यवृत्तिकान्यस्वरूपस्य वा व्याप्यवृत्तित्वस्य संयोगाभावे सत्त्वादित्यत आह सत्त्वपतीति तथा च हेतुसमानाधिकरणस्य
व्याप्यवृत्तित्वं हि सं तेन निरवच्छिन्नहेत्वधिकरणवृत्तित्वं हेत्वधिकरणं यत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगित्वं वाभावस्य विवक्षितमिति
भावः गुरुधर्मस्य साध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य
प्रकृतनिरुक्तावप्रवेशोपि न क्षतिरित्याशयेनाह वक्ष्यमाणं वेति यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्त्वावा
न्जातेरित्यादावव्याप्तिः तादृशप्रतियोगितावच्छेदकीभूतविशिष्टसत्ताया अनतिरिक्तवृत्तिता सत्तात्वस्य सत्तावक्ष्यमाणमिति सिद्धान्तल
क्षणे वक्ष्यमाणमित्यर्थः तथा च हेतुमन्निष्ठाभावीययत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यद्धर्मविशिष्ट
संबंधिनिष्ठाभाववत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकं तदन्यत्वं साध्यतावच्छेदकं वा
च्यमिति भावः ननु सत्ताद्दशायां गुणसामान्याभावस्य संयोगवति घटादौ सत्त्वात् गुणत्वस्य संयोगत्वविशिष्टसंबंधिनिष्ठाभावीयसमवाय
संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वविरहान्न तमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वसंभव इत्यत आह गुणावृत्तित्वेपि गुणासम
वेतत्वमित्यर्थः घटादावुत्पत्तिदशायामपि गुणासमवेतस्य द्रव्यत्वादेः सत्त्वान्न तदभाववृत्तिभावः संयोगी गुणान्यत्वे सतीत्यादि
सादौ गुणावृत्तित्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं संभवति गुणावृत्तित्वावच्छिन्नाभावस्य हेतुसमानाधिकरणत्वात् अ

तः संयोगस्साध्यकव्यभिचारिमात्रे यद्धर्ममादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं तद्धर्ममाह द्रव्यमात्रेति द्रव्यान्यासमवेतत्वमि
त्यर्थः उक्ताभावानामव्याप्यवृत्तित्वे संयोगात्मकस्वप्रतियोग्यधिकरणवृत्तित्वेन कदाचिद्गुणत्वादिरूपाणां तत्प्रतियोगितावच्छेद
कानां संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं न स्यात् तदेव तु नास्ति तेषां व्याप्यवृत्तितया संयोगात्मकस्व
प्रतियोग्यधिकरणावृत्तित्वात् एतावन्मात्रस्य तु न्याय व्याप्यवृत्तीत्युक्तं इति लक्षणं ॥ ॥